सीताविचारलहरी

तरणीसमेता

Sanskrit
Sītāvicāralaharī
Sanskrit translation of
N. Kumaran Asan's Cintavistayaya Sītā by
N. Gopala Pillaī M. A.
and its commentary Taranī by
D. Damodara Pisharodi, Panditaraja

Published by
D. Damodara Pisharodi
Narayanalayam, Kandiyoor Pisharam
Mavelikkara - 3, Tattarampalam P.O.
1978
Price Rs. 6-00
Copies 500
Printed at S B Press, Tvm.

Under permission obtained by D. Damodara Pisharodi
from Mrs. N. Gopala Pillai

सीताविचारलहरी

तरणीसमेता

मूलकाव्यकर्ता एन्. कुमारन् आशान्

अनुवादकः एन्. गोपालपिल्ळ एम. ए.

व्याख्याता डि. दामोदरपिषारकः

WORKS BY PANDITARĀJA

D. DAMODARA PISHARODI

1) Commentary on Prahladacaritam, by Pariksit Thampuran, Maharaja of Cochin.
(Copies available at Mangalodayam Press, Trichur.)

2) Commentary on Sugalarthamala by Panditaraja P. Narayanan Namboothiri.
(Copies available from P. Narayanan Namboothiri, Sreenadam, Tripunithura.)

PREFACE

CINTĀVIṢṬAYĀYA SĪTA (*Reveries of SĪTA*) by N. Kumāran Āśān is a well known poem of modern Malayalam. By translating it into beautiful and chaste Sanskrit. Professor N. Gopala Pillai, who was a brilliant scholar and a discerning critic, has made it possible for Sanskrit-knowing non-Malayalees to appreciate this little masterpiece. The translation closely follows the original, though the construction of sentences has been altered here and there to suit the genius of Sanskrit language.

Since the publication of the original in 1920 critics have not been wanting, who found fault with the poet on the ground that the character of SITA depicted here is totally different from her character as delineated by Vālmīki or Kālidāsa. Another criticism levelled against this poem has been that the reflections welling up in SITA's mind lack in internal coherence. However on a careful reading of the poem I am convinced that both these criticisms are without any substance. The reflections of SĪTA as presented here are perfectly consistent with her character as presented by Vālmīki in Rāmayaṇa or by Kālidāsa in Raghuvaṁśa, and they have a wonderful logical sequence. It was my desire to establish this fact which impelled me to write a commentary in Sanskrit on Professor Pillai's translation.

This commentary has been completed about ten years ago. It was sent to Professor Pillai who read it carefully, highly commended it and wanted me to publish it. However, owing to various reasons it had not been possible for me to get this printed while Professor Pillai was still alive,

and this has been my regret. I am grateful to Srimathy Vijayamma Gopala Pillai for graciously permitting me to publish Professor Pillai's translation along with the commentary.

My thanks are due to Sri N. V. Krishna Warrior who has contributed an introduction to the present work, to Sri M. Madhavan Unni, Research Officer in the Manuscripts Library, University of Kerala, Trivandrum, who has rendered valuable assistance in various ways in seeing this through the press and to the Proprietor of S. B. Press, Trivandrum for printing it neatly and expeditiously.

With great pleasure I place this work in the hands of indulgent readers.

न सर्वं सर्वस्य प्रियमपि भवेदप्रियमपि
क्वचित् केचित् किञ्चिद्दधति यदि सार्था मम कृतिः

Kandiyoor
Mavelikkara-3
12 March, 1978

D. Damodara Pisharodi

INTRODUCTION

Mahākavi Kumāran Āśān (1873-1924) is justly hailed as the morning star of renaissance in Kerala. Born in the then-untouchable Ezhava caste, he fell. in his early teens, under the benign influence of the dynamic personality of Saint Sri Nārāyaṇa Guru, who took no time to detect the latent talents of his young disciple, and sent him to Bangalore, Madras and Calcutta to undergo higher studies in Sanskrit. Returning to Kerala in 1900, Kumāran Āśān assisted his Preceptor in founding the Sri Nārāyaṇa Dharma Paripālana Yogam, which, in a few years, became the spearhead of social reform and played a notable role in the modernisation of Kerala. His short poem, "The Fallen Flower", published in 1907, has been acknowledged as the first shot in the romantic revolution in Malayalam poetry. As a pioneering poet, talented editor, ardent social reformer and able organiser, Āśan left an indelible impression on his contemporaries in the next sixteen years. He was nominated as a member of the popular Legislative Council in Travancore which position he fully utilised in promoting the interests of the backward communities in the State. In addition to being the foremost poet of his period he was also a forceful prose-writer, a penetrating ctitic, a convincing orator and an imaginative entrepreneur. His poetical works revealed not only his complete mastery over the language and the imagery but also a mature philosophical welt-anschauung which placed unequivocal emphasis on liberal humanism and the pressing need for undoing the age-old social injustices. At the acme of his intellectual powers he was snatched away by death in 1924 in a boat-tragedy.

CINTĀVIṢṬAYĀYA SĪTA (SĪTA's Reveries) is considered by many as the magnum opus of Kumāran Āśān. This poem consisting of 192 stanzas brings out not only the deep insight of the poet into the inscrutable intricacies of human psyche but also his enlightened conception of the ideal womanhood. From the start to the finish the poem is majestic, sublime and soul-stirring, and embodies some of the most profound philosophic reflections on the unfathomable human destiny.

Kumāran Āśān has been singularly fortunate in obtaining an ideal translator in Professor N. Gopala Pillai, who presided over the destinies of the Maharaja's College of Sanskrit, Trivandrum from 1939 to 1957, and was renowned for his vast scholarship as well as rich poetic gifts. His Sanskrit versions of the Malayalam poems. *PREMASANGĪTAM* by Ulloor S. Parameswara Iyer, and *SITA's Reveries* by Kumāran Āśān, not only reveal the ease and facility with which he could handle the medium of Sanskrit but also provide an opportunity for those who do not comprehend Malayalam to get some acquaintance with the cream of modern Malayalam poetry.

The Sanskrit commentary on "*SĪTA's Reveries*" by Panditaraja D. Damodara Pisharoti is an excellent guide to those who want to sound the depths of this deep poem. By providing suitable introductions to each stanza in the best tradition of the commentators in Sanskrit, Sri Pisharoti brings out clearly the logical consistency of the seemingly rambling reflections of the heroine. By showing the five SANDHIs and the constituents thereof in the plot, the commentator establishes its perfect construction, which, according to Abhinava Gupta, is essential not only in dramatic but also in epic literature if the sentiments are to

be properly delineated. The layers of meaning suggested by each word is explicated and the figures of speech (Alamkaras) are pointed out. Sri Pisharoti is one of the few remaining profound Sanskrit scholars in Kerala with equal mastery over Vyākaraṇa, Nyāya and Alamkāra Śāstras, and the commentary bears eloquent testimony to his versatility.

With great pleasure I commend this beautiful Sanskrit version of the great Malayalam poem and its equally magnificent commentary to the Sanskrit-knowing Sahrdayas all over the country. I have no doubt they will greatly enjoy and profit from a close study of, both the poem and the commentary.

Darśan
Palkulangara
Trivandrum-24
12 March, 1978

N. V. Krishna Warrior

श्री

सीताविचारलहरी

तरणीसमेता

निधाय चित्ते चरणौ गुरूणां
तथा वचः, कौतुकचोदितोऽहम् ।
कौमारसत्काव्यविवर्त्त हृद्यं
सीताविचारं विवृणोमि किञ्चित् ।।

धर्मस्त्रिवर्गेषु नरेण सेव्य इतीदं बुबोधयिषुणा राघवेण आविवाहाद् गृहे वने शैशवे यौवने च प्रतिक्षणप्रवृद्धौत्सुक्यप्रेममूर्च्छनामासेदुष्या अपि कीलीनमीतेन त्यक्तायां मैथिल्यां हृदि विवर्त्तमानानां भावानां स्वहृदयहृदयदर्पणे प्रतिबिम्बमाधित्सुर्महाकविः कर्त्तव्यनिर्णीनीषाप्रवृत्तचिन्तामथितायास्तस्याः सम्प्रवस्थामुपक्षिपन्नुपक्रमते—

सुतयोर्गतयोर्महर्षिणा सह साकेतपुरीं दिनात्यये ।
उटजोपवने स्थितैकदा बहुचिन्तामथिता हि मैथिली ।। १ ।।

सुतयोर्गतयोरिति सप्तम्यद्विवचनेन चिन्तामथने हेतुरुक्तः । महर्षिणेति सान्निहिततत्सीतादेहत्यागवेत्तृत्वं बोधयता श्रीवाल्मीकेः पताकानायकत्वं सूचितम् । तद्व्यापारफले हि स्वकाव्यप्रख्यापने तद्द्वारा देवीदेहत्याग सम्पादनञ्च । उक्तञ्चाभिनवभारत्याम् — "पताकानायको हि यथा स्वार्थे प्रवर्त्तते, परार्थञ्च" इति । दिनात्यय इति कालस्य, उपवन इति देशस्य च चिन्तोचितसोक्तिः । एकदा देहत्यागपूर्वदिने । तथा ऽनुक्तिः कवेर्भावावहित्वात्, यथा "कश्चित्कान्ता" इत्यत्रा कश्चिदिति

यक्षस्य। तथाच भट्टौतः "नायकस्य कवेः श्रोतुः समानोऽनुभवस्ततः" इति। चिन्तायां बहुत्वं दीर्घकालत्वं बहुलविषयत्वञ्च। मथितेत्यत्यन्ततिरस्कृतवाच्यमवस्थान्तरप्राप्तिं लक्षयत् पारवश्याधिक्यं व्यनक्ति। अवधारणे हिर्मथनस्यात्यन्तायोगं व्यवच्छिन्दन् प्रतिपादयिष्यमाणानां सम्भाव्यतावोधनद्वारा सहृदयहृदयसंवादमार्गशुद्धिं विधत्ते। मैथिलीति जनकलब्धविनयनवत्त्वव्यञ्जनेनाविमृश्यकरणशङ्कामपाकरोति। अतो धीरोदात्तेयं नायिका। तदीयदेहत्यागात्मकमुख्यप्रयोजनपर्यवसायिनः श्रीवाल्मीक्यादिप्रासङ्गिकव्यापारोपस्कृतस्य विचारलहरीरूपप्रधानेतिवृत्तस्य मुखसन्धिः सुखविरोधरूपस्य बीजस्य देहत्यागोत्सुक्यरूपस्यारम्भस्य च द्वयोर्मेलनात्मा आषोडशश्लोकं व्याप्नोति। अत्र च बीजन्यासात्मोपक्षेपस्तदङ्गमवगन्तव्यम् ॥१॥

अष्टभिश्चिन्तोचितां दशामाह—

विटपोऽभजदत्र कस्यचित् सुशिरीषस्य नवातपत्रताम्।
हरिनीलनृणानि चाऽभवन्नथ सत्या मृदु भद्रमासनम् ॥२॥

विटप इत्येकत्वमातपत्ररूपणोपयोगि। अत्र विजनोपवने। सत्युपकरणतापाप्तस्य धन्यतां विचिन्त्य सु इति। आतपत्राहैताद्योतकं वा। विच्छिन्नातपत्रसम्बन्धस्य पुनर्लाभान्नवेति। अथेति योग्यतारूपेऽधिकारे। योग्यमित्यर्थः। अत एव मृदुरिति। रूपकद्वयं "क्व भोगमाप्नोति न भाग्यभाग् जनः" इत्यभिप्रायेण। अत एव सत्या इति ॥२॥

चिन्तामथित्वं कार्येण प्रकाशयति—

अपि चास्तमयं विजस्वतो जगतश्चन्द्रिकयाऽभिपूरणम्।
विजनमेव विविक्तमात्मनो नहि सस्मार वसुन्धरेश्वरी ॥३॥

कालविलम्बासहो हि चिन्तां शिथिलयेत्, नैतदुभूदिति। विविक्तमेवेति योजना। अपिचेति कर्मत्रयसमुच्चये। वसुन्धरेश्वरीति प्रशंसा।

पर्यायोक्तं प्रस्तुताङ्कुरो वा ॥३॥

तात्कालिकीं सुषमां, सीतायास्तदनाकृष्टताव्यक्तये वर्णयति–

पुलकान् कुमुदैः स्फुटं ह्रदे तमसोमन्थवहेन तन्वता ।
वलिता वनराजिरादधौ कलधौतश्रियमेन्दवार्चिषा ॥४॥

ह्रदे कुमुदैः पुलकान् स्फुटं तन्वतेति योजना । कुमुदविकासात्मकपुलकननकर्तृत्वं गन्धवह उत्प्रेक्ष्यते । तस्य तमसासम्बन्धित्वं शैत्यादि गमकं सच्चिन्ताभङ्गप्रसक्तिं व्यनक्ति । वनराज्यां कलधौतश्रीमत्त्वारोपो निदर्शना । परोपासकचेतनव्यापारप्रतीतेः समासोक्तिश्च ॥४॥

चिन्तामग्नतामेव व्यनक्ति–

विधुतां नवमल्लिकाततेर्मरुतेवोपहृतां सुमावलिम् ।
घनवेणिरुवाह कैशिके कलितां तैजसकीटपङ्क्तिकाम् ॥५॥[1]

तैजसकीटपङ्क्तिकायामुपहारसुमावलीत्वोत्प्रेक्षा समासोक्तिसङ्कीर्णा "किमिव हि मधुराणां मण्डनं नाकृतीनाम्" इत्यभिप्रायेण । अत एव घनवेणिरिति मण्डनार्हतोक्ता । कैशिक एकीकृतबद्धे केशसमूहे । पङ्क्तिकेति प्रकारवचने कन् । प्रकारश्च भेदात्मा । तेन पङ्क्तिबहुत्वं गम्यम् । त्रिभिरेभिश्चिन्तायां बीजस्य बहुलीकरणं परिनिष्पत्तिश्चोक्ते इति परिकरपरिन्यासौ सन्ध्यङ्गे ॥५॥

रुचिरः कबरीभरस्तदा परिशोभाभरितो बभूव सः ।
विशदोडुपथांशको यथा निशि दृश्यस्तरुवाटिकान्तरे ॥६॥

स उक्तपङ्क्तिकावान् । उडुपथांशस्याल्पत्वात् कप्रत्ययः । उपमयाऽन्योन्यपरभागलाभो व्यङ्ग्यः ॥६॥

1 वनेति पाठान्तरम् ।

शुशुभेऽशुकपल्लवेन सा किल देव्यास्तनुवल्लिरावृता ।
मृदुलोरुतले निधाय ते भुजशाखे निजनाद सुन्दरी ॥७॥

सा क्षमक्षामा । किलेति निश्चये "इदं किलाऽव्याजमनोहरम्" इत्यत्र यथा । शोभां निश्चिनोमीत्यर्थः । अत एव देव्या इति । दुःखाद्यस्थायामीषद्द्योतनखभावाया इत्यर्थः । ते अलसे । सावयवं रूपकम् । तनोर्वल्लेश्च भेदो भेदकधर्मो वा न लक्ष्यत इति मीलिते सामान्यं वा ध्वन्यते । सुन्दरी प्रियदर्शना । अनयोश्चिन्तोचितावस्थितिप्रशंसया गुणवर्णनरूपं विलोभनमङ्गम् ॥७॥

सर्वे भावाश्चक्षुषि व्यज्यन्त इति चाक्षुषीं स्थितिमाह—

स्फुटलक्ष्यमृते स्थिते दृशावविकासे दरशीलिते उभे ।
बहुता मरुता प्रसारितेष्वनिमेषे परुषालकेष्वपि ॥८॥

"ऋते च द्वितीया" इति चान्द्रसूत्रेण द्वितीया लक्ष्यमिति । स्थिते निश्चल—तारे । अविकासे इति मुकुलसाम्यम् , उभे इति एकाकारताञ्च गमयति । अनिमेषे इत्यक्षिपुटधर्मोक्तिः । प्रसारितेष्वपीति योजना । अपिरविकासादिभिर्विरोधे । निर्वेदचिन्तयोरुचिता शून्या दृष्टिरुक्तेति बीजागमरूपं समाधानमङ्गम् ॥८॥

अलसावयवाऽपि निश्चलं प्रगुणं साऽऽस्त तदाऽऽनताङ्गयष्टि
नियमेन विना यथाऽनिलो विलिखेवास बलाऽन्तरा सती ॥९॥

अत्राऽऽपिर्विरोधे । यथेत्युपमया सविशेषाधिकश्वसनस्याऽयत्नजातत्वं गम्यते । तेनाऽनिवार्यत्वञ्च । बतेति देवीखेदेन खखेदे । सतीत्यनेन तदनर्हता गर्भिता । प्रकरणेऽस्मिन् उक्तावस्थाया देव्याः प्रत्यक्षायमाणतया भाविकम् । निर्वेदचिन्तादैन्यासूयाचिन्तास्मृत्यावेगविषादौत्सुक्यमत्या-दीनामुपरि व्यज्यमानानामनुभावा वर्णिताः ॥९॥

चिन्तायां निपतामवस्थामुक्त्वा तत्कार्यभावाविर्भावमाह–

अतिवेलमथोत्तरङ्गितो हृदि देव्यास्तु विचारसागरः ।
सुकपोलतटे विनिर्मले नवभावान् विविधानकल्पयत् ॥१०॥

अथेति भावकल्पनारम्भवाची । देव्या धीरोदात्तायाः । अनेन भाव-कल्पनमबुद्धिपूर्वकमिति द्योत्यते । तुर्विशेषे । विचारो यथायथमुक्त-भावानां कार्यकारणभूता चिन्तैव सागरः । अनिषेध्यत्वं गम्यते । अतिवेलत्वमविच्छिन्नत्वं कूलातिक्रमश्च । उत्तरङ्गित ऊर्ध्वप्रसारिततरङ्ग उत्तरोत्तरभावानुबन्धी च । सुकपोलतट इत्येकवचनेन साचीकृत्याऽव-स्थानं गम्यते । सुनिर्मले स्फुटदृश्यानुभावके । नवान् प्रतिक्षण-मुन्मज्जतो निमज्जतश्च भावान् । अकल्पयत् स्फुटदृश्यान् विदधे ॥१०॥

विचारस्यानिषेध्यतां तत्प्रकारञ्चाह–

भ्रमदाकुलमक्षमा मनो विनिरोद्धुं तु विचारभाषया ।
निजगाद सखेदमन्तरा वच एवं हि महामनस्विनी ॥११॥

आकुलमस्वाधीनम् । अत एव भ्रमद् नियतविषयस्थितिशून्यम् । विचार-भाषयेति रूपकमुपमा वा । तुरेवार्थे । तेनाऽचापल्यं गम्यते । अतएवाऽन्तरेति । विचारभाषास्वीकारे हेतुर्महामनस्विनीति । हीति प्रसिद्धौ । अत्र पूर्वत्र च प्रकृतार्थसमारम्भरूपं करणमङ्गम् ॥११॥

अथ देवी आपरिणयादापरित्यागं सर्वत्र सर्वदाऽशिथिलप्रेमसर्वस्व-योः स्वस्य प्रियतमस्य च अन्तराऽन्तरा काकतालीयन्यायेनाऽपतितोः सुखदुःखयोर्विविधाः समवस्थाश्चिन्तयन्ती तासां हेतूनिर्णीय चित्त स्थिरीकर्तुकामाऽपि तेषामनिर्णयादलब्धपदा सती खेदातिशयात् स्वस्य तदर्थमुद्यमो विफल इत्यवधारयति—

नियमोऽस्ति न कोऽपि कस्यचित्, परमायान्त्यपि यान्ति वा दशाः।
भ्रमतोह नरः कुतोऽथवा भवतत्त्वं नहि वेद कश्चन ।। १२ ।।

कस्यचित् तत्तत्कालेषु जायमानस्य सर्वस्याऽपि। नियमः इदानीं मत्राऽयमनेनेत्थं भवतीति निश्चयप्रयोजिका व्यवस्था, नाऽस्ति। परं किन्तु। अपिशब्दौ यानाऽयानयोरहमहमिकाद्योतकौ। अतस्तत्र हेतुगवेषणं मेरुशृङ्गानयनवद् दुष्करम्, गतजलसेतुबन्धवद्विफलञ्चेति भावः। यत्र हेतुः प्रत्यक्षेण दुर्ग्रहः, तत्रानुमानादिना ग्राह्यः, येन भविनि काले इष्टजातीये प्रवृत्तिरनिष्टजातीयान्निवृत्तिश्च भवेदिति चेदाह—भ्रमतीति। इह संसारे। नरो नरसामान्यम्, न स्त्रीपुंसभिदेति भावः। कुत इति लप्तञ्लोपे कर्मणि पञ्चम्यास्तसिल्। अज्ञेयं किमपि फलं विचिन्त्य तत्साधनायेत्यर्थः। भ्रमति आयासमात्मनुभवति। कथमिदं निर्णीयते भवत्या? अत आह—भवेति। भवितव्य सांसारिकवस्तुजातस्य तत्त्व पारमार्थिकं रूपम्। नहि वेद नैव वेत्तुं प्रभवति। लटो नित्यप्रवृत्तवर्त्तमानार्थकाः। तत्त्वनिर्धारणात्मिका मतिः, अलमेभिरिति प्रत्यागात्मा निर्वेदश्च सञ्चारिणौ सञ्चारिणौ अत्र काव्यसाम्राज्ये शमस्थायिकशान्तरसस्यार्वभौमं प्रतिष्ठापयतः। अर्थसम्प्रधारणात्मिका युक्तिरङ्गम्॥ १२॥

तत्र मतिमालम्ब्य तदानीन्तनीं मनोवृत्तिमनुसन्धत्ते—

तरलः सुतरां कणो यथा रसशाल्योश्चलभृज्ज्यमानयोः।
अनवस्थितमीर्यते मनो गुरु भूयो लघु हेतुनाऽधिना ।।१३।।

सर्वे भावाः सत्त्वरजस्तमस्समष्टिरूपप्रकृतिपरिणामाः। तत्र मनो नामान्तःकरणं यदोद्रिक्तसत्त्वं तदा लाघवाज्ज्ञानम्, यदोद्रिक्ततमस्कं तदा गौरवं तत्प्रतिबन्धकत्व विधत्ते। रजस्तूभयत्रापि सहकारितामेतीति

साङ्ख्यराद्धान्तानुरोधेनेयमुक्तिः। "कणो धान्यांशलेशयोः" इति कोशः। चलस्य रसस्य पारदाख्यस्य, भृज्यमानस्य निर्जलं पच्यमानस्य शालेश्चेति क्रमेणान्वयः। आधिना हेतुना असाधारणेन प्रयोजकेन। मनः, अनवस्थितं रजसा चलनस्वभावं सत्। भूयः अन्तराऽन्तरा। गुरु मोहप्रापकम्, लघु ज्ञानसम्पादकञ्च। ईर्यते प्रवर्त्यते। उपमाभ्यां दृष्टादृष्टहेतुकत्वमीरणस्य व्यज्यते। ॥ १३ ॥

नियमोऽस्ति नेत्यादिना सूचितां स्वीयसुखदुःखदशां परामृशति—

भुवनस्य सुविभ्रमावहान् सुखकालानपि तान् स्मराम्यहम्।
अपि दुर्ललितांश्च दुर्विधेर्दुखहासानिव तांस्तिरोहितान्॥१४॥

सुविभ्रमावहान् सविशेषशोभाधायकान्, मिथिलादिषु सखीभिरार्यपुत्रेण च निवसाल्लोकोऽयमानन्दमय इति बोधजनकानिति वा। तान् अवस्तुभावनाविषयान्। सुखकालानिति सुखगतं बहुत्वमारोपितं काले वैचित्र्यं गमयति। तथा साकेतादिषु दुर्विधेः कामस्य दैवस्य दुर्ललितान् दुष्टपरिणामिनो वञ्चनयाऽन्यथा प्रकाश्यमानान् मुखहासान् हर्षाधीनानिव भासमानान् वस्तुतो दुःखहेतुत्वेन दुःखात्मकान् तिरोहितान् तान् सुखकालानपि स्मरामीत्यर्थः। भोक्तरि सुखिनि भोग्यं सुखसाधनम्, दुःखिनि दुःखसाधनञ्च भासत इति नियतिमालम्ब्येयमुक्तिः। एकस्य सुखदुःखरूपाभ्यां भानं विरुद्धमित्यपिशब्दः। विरोधभानोपयोगि च तानिति व्यक्त्यैक्यबोधकम्। उत्प्रेक्षा विधौ वञ्चकतां व्यनक्ति। तदालम्बना व्यज्यमानाऽसूया प्रापञ्चिकेषु निर्वेदस्याऽङ्गम्॥ १४ ॥

उद्रिक्तायास्तस्या बाधिकां मतिमालम्बते—

अपयाति च तापदस्तयो भुवि वर्षाः स्युरथानुवत्सरम् ।
अपि मुञ्चति पत्रकं तरुः क्रमशः पल्लवति प्रपुष्यति ॥१५॥

चापी समुच्चये । अथ क्रमे । अनुवत्सरं सर्वेषु वत्सरेषु । इदं सर्वक्रियान्वयि । पत्रकं शुष्कं पत्रम् । स्वीयसुखदुःखनत्सामग्रीणां क्रमिकं सन्निधिं बोधयन्तीयं सारूप्येणाऽप्रस्तुतप्रशंसाऽप्रतिविधेयतां द्योतयति । इत्थं व्यामिश्रतया सुखदुःखयोः प्रतिपादनाद् "सुखदुःखकृता योऽर्थस्तद्विधान"मिति लक्षितमङ्गम् ॥ १ ॥

मतिनिर्वेदौ युगपदालम्बते—

सुलभेषु मृगादिजन्मिनामवकाशेषु, शुचोऽपि सा द्रुतम् ।
अवसास्यति, मानहेतुना मनुजस्यैव रुजाऽस्त्यनत्यया ॥१६॥

मृगादिजन्मिनामिति षष्ठी आधारस्य सम्बन्धत्वविवक्षया । सम्बन्धस्य नैयत्यं व्यङ्ग्यम् । द्रुतमवसाने भावनानाधायकज्ञ नबहुलत्वं हेतुश्चानेन गर्भितः । अवसास्यतीति लट् शुगनुभवकालापेक्षया भविष्यत्त्वात् । मानेनैव हेतुना । मनुजस्य भावनाधायकबोधस्य । खस्येव रामस्याऽपीदृशी दशेति पुंस्त्वनिर्देशः । अप्रयोगेऽपि सिद्ध्यऽभेः प्रयोगो रुजाया अत्यन्तायोगव्यवच्छेदप्रत्यायनार्थः । सामान्यतोऽप्रस्तुतप्रशंसा वाच्या, व्यतिरेको व्यङ्ग्यः । मयाऽपि रुजा शान्तये मनुजत्वनिवर्त्तनक्षमः शम एव शरणीकरणीय इति चिन्तारूपबोजप्रयोजनस्य देहत्यागस्य सम्पादनीयतयाऽध्यवसायात्तत्रौत्सुक्याच्च समाधानकरणे अङ्गे विन्यस्ते इति साङ्गो मुखसन्धिरिति सहृदयैराकलनीयम् ॥ १६ ॥

एवं शोकसागरतरङ्गायितेष्वीदृविपत्तरणिं मतिं निर्वेदानुकूलानिलान्दोलितामारूढा मैथिली, मुन्यावेदनसन्ततिसन्तुष्टे राममद्रे;

तत्समावेदकं सुनिमित्तमनुभवन्त्यपि, चक्रनेमिभ्रमवत् सुखं दुःखोदर्कमवधारयन्ती तत्समागमस्याऽधिकानिष्टसाधकतां निश्चिन्वती च तत्र दोषमाविष्करोति—

कृमिवत् स्फुरतीह मेऽसको ननु वामोऽप्यधुना वृथा किल ।
अनुभोगमतः परं शिशुर्न निजच्छायमिव भ्रमाम्यहम् ।।१७।।

इह प्रियसमागमायोग्ये तपोवने, विपर्यस्तभागधेयेऽस्मिन् काले वा । मे शोकसागरनिमग्नायाः । नन्विति सम्प्रधारणे । स्फुरणमवधारयामीत्यर्थः । वामो विपरीतो वामभागिकश्च अपीत्याद्यर्थस्य विरोधे । किलेत्यरुचौ । स्फुरणं नेष्टमित्यर्थः । कृमिवदिति तत्यागणयत्वमुक्तम् । अत एव वृथेति । कुतो न गण्यम् ? तत्राह—अन्विति । भोगं लक्ष्मीकृत्येत्यर्थः । शिशुर्न निजच्छायमिति व्यतिरेकणोपमा । शिशुः कृत्याकृत्यविधुरः । अहं निर्णीतविषयस्वभावः । प्रकृष्टशोकाभिभूतानां "यावतः कुरुते जन्तुः सम्बन्धान् मनसः प्रियान् । तावन्तोऽस्य निखन्यन्ते हृदये शोकशङ्कवः" इति विवेकेन विषयेषु दुष्टताध्यवसायस्य युक्तत्वात्, प्रियस्यैवाऽप्रियकारित्वाच्च नेतः परं विषयसुखं वृणे, तस्मादिदं स्फुरणं न गणयामीति भावः । निजच्छायमित्यत्र "विभाषा सेना" इत्यादिना क्लीबत्वम् । मतिर्निर्वेदावेक्ष्यऋजकानुप्रविष्टौ परं शान्तं पुष्णीतः । एतदाद्याचतुश्चत्वारिंशन्निवेदसङ्कीर्णदेहत्यागप्रयत्नस्य रामप्रेमादिविषयिण्या चिन्तयेषद्बाधितस्य प्रेमादौ दोषदर्शनरूपया मत्या पुनरुद्रिक्तताम् प्रपन्नस्य चिन्तास्थितीभवरूपावान्तरफलकस्य निर्वेदोश्च सङ्कीर्णतया विन्यासात् प्रतिमुखसन्धिः । तदङ्गेषु प्रस्तुतशमस्थैर्याभिलाषात्मा विलासस्त्वितः पञ्चसु ॥ १७ ॥

"अथवा भवितव्यानां द्वाराणि भवन्ति सर्वत्र" इति सुनिमित्तस्य अन्यशुभोदर्कतां सम्भावयति—

निशमय्य मुनेर्मनोहरं नवकाव्यं मनुवंशनायकः ।
अनुतापमुपैति वाऽधुना स पिता स्वौ तनयाववैति वा ॥१८॥

मुनेरिति तथ्यवक्तृत्वम्, मनोहरमिति निशमने हेतुम्, नवकाव्यमिति तदौत्सुक्यम्, मनुवंशनायक इति महाकुलीनतयाऽनुतापार्हताम्, स इति प्रथितकीर्तिताम्, पिता स्वाविति स्वाभिवत्सलताम्, तनयाविति वंशप्रतिष्ठापकत्वेन कृतकृत्यम्मन्यताञ्च व्यनक्ति ॥ १८ ॥

साक्षात् स्वेष्टासाधकोऽपि त्वद्वात्सल्यास्पदतनयवात्सल्यवतःप्रियस्य समागमो न द्वेष्य इति चेदाह—

यदिवा न लयं गताः स्वयं प्रियभावाः पतिरागजाः समे ।
हृदि न प्रकटं लगन्ति ते प्रतिनादा लघवः श्रुताविव ॥ १९ ॥

यदिवा यद्यपि प्रियभावाः "अद्वैतं सुखदुःखयोः" इत्यादिरूपेणोन्मीलनार्हाः। प्रियरागोत्पन्नाश्चित्तवृत्तयो न लयं गताः, किन्तु साक्षिभास्या विराजन्त एव । तथापीत्यर्थात्। ते हृदि प्रकटं न लगन्ति स्वनियतां प्रवृत्तिं नोत्पादयन्ति। मनोहरत्वेऽपि फलासाधकत्वमुपमया व्यज्यते। अतः पुनरपि समागमो न काम्यत इति । १९ ॥

दीप्तस्य तत्सम्बद्धानाञ्च प्रकाश इव निरतिशयानन्ददस्य रागस्य तन्नियतभावानां च कुतो न लगनम्? तदाह—

क्षणमात्रवियोग एव हृद्व्रणमापादयदुद्बणो हि यः ।
निजशीर्षमनुन्नमय्य स स्वधितीव प्रणयः शयुर्यथा ॥ २० ॥

एवकारोऽप्यर्थे। हृद्व्रणं दुःसहं क्लेशम्। उद्बणः प्रौढिमारूढः। आपादयद् उदपादयत्। इति स्वानुभूतमाह। यथोक्तम्-"अस्मिन्नेव लतागृहे त्वमभवः" इत्यादि। सः प्रणयः। निजशीर्षमनुन्नमय्य स्वकार्यसिद्धिमुख्यमप्राप्य। स्वधितिवेति अज्ञेयतामाप्नोति। इवेत्युत्प्रेक्षया फलसाधना-

सामर्थ्यं गम्यम्। शयुर्वाहसः। यथेत्युपमया कार्योन्मुखत्वे तु दुस्सहानिष्टसाधकत्वं व्यज्यते। ततोऽलगनमेव मे वरं प्रतिभातीति ॥ २० ॥

प्रणयस्य नैष्फल्ये तदाश्रयस्याऽपि तदायातमिति निर्वेदं व्यनक्ति—

स्वयमिन्द्रियमोदहेतुषु स्वकभावेषु गतेषु केषुचित्।
भजते दयनीयतां मनो गतपारावतपञ्जरोपमम् ॥२१॥

इन्द्रियमोदहेतुषु इन्द्रियाधीनानन्दं प्रति सहकारितां प्रपन्नेषु। मोदे इन्द्रियाणां सम्बन्धित्वोक्तिस्तदनुत्पत्तौ तद्वैफल्याभिप्रायेका। स्वकेषु अनन्यसाधारणेषु भावेषु प्रेमादिषु। स्वयं गतेषु कारणविरहेणाऽनुत्पद्यमानेषु सत्सु तदास्पदं मनोऽपि दयनीयतां भजते। न रक्षणीयमित्यभिप्रायेणोपमा गतेत्यादि। अतो मनोधारणाय शरीरं न धारणीयमिति ॥ २१ ॥

"नियमोऽस्ति न कोऽपी"त्यादूयूनीकृतं भवत्यैव। अतः प्रणयादेरुन्मज्जनं नासम्भाव्यमिति शरीरान्तं भोगसाधनं न त्याज्यम्। यदुक्तमादिकविनैव "जीवन् प्राप्नोति भद्रकम्" इति चेदाह—

उदयास्तमयौ विना सदा हृदयाकाशतले समुज्ज्वलम्।
विरराज करं प्रसार्य यः, स च चन्द्रः स्मृतिदर्पणे स्थितः॥२२।

उदयास्तमयौ प्रथमचरमदर्शने। विविधभावावकाशदातृत्वाद् हृदय एव आकाशतले। समुज्ज्वलं निरावरणं सुतरामानन्ददायि च यथा तथा। करो हस्तो रश्मिश्च। स आर्यपुत्र एव चन्द्रः। अनुभूतान्यूनानतिरिक्तभासकत्वेन स्मृतिरेव दर्पणः तत्र। स्थितः पुनरुदयं विना तिरोहितः। न चक्षुषाद्यहं इति यावत्। "ष्ठा गतिनिवृत्तौ" इति धातुः। अतः समागमाशायामनवकाशायां जीवितत्याग एव युक्त इति। अत्र इष्टनष्टानुसन्धानरूपानुसर्पणेन परिसर्पोऽङ्गम् ॥ २२ ॥

प्रणये दुःखोदर्के निर्णीतेऽध्यवसितपूर्वजीवितत्यागोपायमनुसन्धत्ते—

उचिता व्रतवृत्तिरीयते, सशमः काल इहाऽऽत्मविद्यया ।
विशुचाऽस्म्यवमानशल्यमप्यवशिष्येत विवेकशक्तितः ॥२३॥

उचिता शीलिता, योग्येत्यप्यर्थः । व्रतवृत्तिः व्रतोचितो व्यापारः । एतदन्यस्याऽनर्हतेत्यभिप्रायेणोचितेत्यनूद्य व्रतवृत्तिर्विधीयत इति नाविमृष्टविधेयांशः । ईयते, "ईङ् गतौ" इति धातोः । सशमः नियतशान्तिः । इह ज्ञानवासिष्ठादिप्रभवे देशे । आत्मविद्यया आत्मविचाररूपयोपनिषद्विद्यया । अनात्मविद्याप्रवणत्वमर्थान्निरस्तम् । अङ्गीकृतस्य फललाभमाह-विशुचाऽस्मि । शुचेत्याबन्तः । तर्हि चिन्तायाः का प्रसक्तिः? तत्राह—अवमानशल्यमिति । रूपकेण दुरुद्धरत्वं गम्यते । विवेकस्य उक्तविद्याधीनस्य निर्णयस्य शक्तिः । अपिर्विरोधे । विवेकेनाऽप्यध्वस्तेऽवमाने आधिक्यात्तन्निवारणोपायचिन्तेदानीं प्रसक्तेति। अत्र शमस्योद्दीपनानि वितेनानि। एतदादिचतुस्त्रिंशान्तेष्वरत्युपशमात्मा शमोऽङ्गम् ॥२३॥

यद्यवमानशल्यमवशिष्यते, तर्हि सतीव शरीरं कुतो नोदस्राक्षीः ? तत्राह—

अविहाय शरीरकं मया दयया गर्भभरो यतो धृतः ।
पृथुकौ प्रियचेष्टितैर्हि मे व्यदधातां कुतुकं स्वनिष्कृतिम् ॥२४॥

सत्यम् खतः शीर्यमाणमत एव कुत्सितमिदं कलेवरमुदस्रांक्ष्यम् यदि गर्भिणी नाभविष्यम् । अनुत्सर्जनाल्लब्धमुत्कृष्टं फलमित्याह-पृथुकाविति ।"अनन्दयन्थिरेकोऽयमपत्य"मिति लक्षितौ । मे निर्भागधेयतया सम्भावितायाः । स्वाभ्यां निर्व्याजनिष्कृतिम् । कुतुकमीषदनुस्य सुखनियता भूयोऽनुबुभूषा । गर्भधारणपरिपाकरणायेव पुत्रयोः कविधानमिति गम्योत्प्रेक्षा ॥२४॥

उक्तं सामान्यतः समर्थ्यते—

हृदयद्युतिकारिणा तमो हियते यैर्मृदुहासरश्मिना।
नरजीवनवेदनामिमां शिशवस्ते प्रतिहन्तुमौषधम् ॥२५॥

हृदयद्युतिरानन्दजा। शीलार्थे णिनिः कारणेति। तस्यां सामर्थ्यमाह—तमो दुःखमन्धकारश्च। दुःखे विवेकतिरोधायकत्वं, शिशुषु चन्द्रत्वञ्च गम्यते। वेदनातिशयजनकत्वान्नरजीवनमेव वेदना। औषधमुपायः। नियमतो वेदनानिवृत्तिर्गम्या॥ २५॥

तामेव कालतो देशतश्च दृष्टान्ताभ्यां स्फुटयति—

स्फुटतारतति‌र्दृढे तमस्युदधौ द्वीपगणोऽस्ति चान्तरा।
उपयात्यपनेतुमामयं नहि हेतुर्न महाविपत्स्वपि ॥ २६ ॥

बोधितमर्थमुपनीय कथयति—उपयातीति। आमयं तन्नियतं क्लेशातितशयम्। एवार्थकहिंसहिंत नञ्द्वये विपरीतशङ्कापसक्तिमपाकरोति। तथाच वामनः—"सम्भाव्यनिषेधनिवर्त्तने नञ्द्वयम्" इति। अपिरापातती विरोधे॥ २६॥

हेतूपयानेऽपि हेतुं निश्चिनोति—

इदमेवमवेयते ततो नहि जन्तौ नियतेः स्थिरारिता।
प्रहरत्यमुमेकबाहुना ननु संवाहयतीतरेण सा ॥ २७ ॥

ततः हेतूपयानादेव। अवेयते निश्चीयते। इदमर्थं विवृणोति—नहीति। नियतेरचिन्त्यशक्तेः। जन्तौ न केवलं नृषु। अरिता अनिष्टसाधकता। स्थिरा सदातनी। बाहुपदमुपायस्य लक्षकं स्वाधीनतां व्यनक्ति। प्रहरति अनिष्टं जनयति। संवाहयति इष्टं जनयति। नन्विति निश्चये। अनियतसुखदुःखसम्पादकस्त्रीव्यवहारप्रतीतेः समासोक्तिः॥ २७॥

उक्तेऽर्थे विपर्ययशङ्कानिवारकं तर्कं प्रकटयति—

तत्र एव निरन्तरं सदा सरणिः स्याद्विषमेह जीविनः ।
स्फुरतः सुखदुःखके उभे खलु तेजस्तमसी यथा मुहुः ।। २८ ।।

तत्र एव नियतेः स्थिरतारूपायाम् । इह देव । निरन्तरमविच्छेदेन । जीविनः प्राणिमात्रस्य । सरणिः पन्था उपायश्च । सदा अनुत्खातिनी सुखानुकूला च । सर्वैरपि गम्यते । विषमा उत्खातिनी दुःखानुकूला च । अत्र विरोधाभासो द्रष्टव्यः । इह संसारे । ततः किमायातम् ? तत्राह—स्फुरत इति । सुखं दुःखञ्च सुखदुःखे । ततः कुत्सायां कः । दुःखमप्यनिनः सुखमपि कुत्सा । उभे इति मिथो मिश्रतागमकम् । खलुचलौ प्रसिद्धौ । तथा च नियतेर्यदि स्थिरारिः स्थिरमित्रं वा स्यात्, तर्हि प्राणिषु सुखदुःखयोरन्यतरच्छियते तद्यादिति । मुहुरिति चक्रकं गमयति । उपमया संसरिणामवर्जनीयत्वं च ॥ २८ ॥

कार्यकारणयोर्भेदवादिनां मतेन सुखदुःखचक्रकमुपपाद्य तयोरभेदमातिष्ठमानानां मतेन तत् समर्थयते—

अथवाऽस्ति तदेकमेव यत् परिवर्त्तत सुखासुखे इति ।
अत एव न विभ्रमन्ति ते मतिमन्तस्त्वनयोर्द्वयोरपि ।।२९।।

अन्तःकरणपरिणामः सुखदुःखे इति साङ्ख्याः । ब्रह्मविवर्त्त इत्यद्वैतिनः क्षणिकविज्ञानाकारविशेष इति बौद्धाः । तथाचैकमन्तःकरणम्, ब्रह्म, विज्ञानं वा सुखदुःखे इति प्रकाशाद्वितया परिणमते, विवर्त्तते, आकरोति वेत्यर्थः अत एव तयोर्दूरीशखभावत्वादेव । मतिमन्तस्ते विवेकित्वेन प्रथिताः तु न विभ्रमन्ति सम्पादनीयतां हेयतां वा न गृह्णन्ति अपि विशेषं द्योतयति ॥ २९ ॥

इत्थं गते मयाऽत्र किमध्यवसितम् ? तत्राह—

---

1 इतिशब्दोत्यादौ इतिशब्दस्य प्रकाशार्थत्वं प्रथितम् ।

सन्निपन्न सुखं मयेष्यते, तदहं दुःखमितः परं वृणे ।
स्पृहयेदसुखाय चेन्मनः स्वयमीर्ष्यां विजहाति दुर्विधिः ॥३०॥

तत् सुखदुःखनत्त्वस्य निर्णीतत्वात्। खसाध्यधीनस्य दुःखस्यावर्जनीयत्वात्तूं भोक्तव्ये प्रसक्तमिति तन्निवृत्त्युपायं निर्णीतमाह-अहमिति। खतो दोषात्स्यदं कथं वरणीयम ? तत्राह —स्पृहयेदिति। असुखाय दुःखाय। "स्पृहेरीप्सितः" इति सम्प्रदानत्वाच्चतुर्थी। दुर्विधिः इष्टविपरीतसम्पादनव्यसनी विधिः। ईर्ष्यामि इष्टेतरप्रदानविषयिकाम्। खयं विजहाति स्वेर्ष्यायां बन्ध्यात्वनिश्चयादिति भावः। "भुजङ्गप्रयातं पठेद्यन्तु .... व्रजत्यच्युतम्" इतिवल्लटः साधुत्वम्॥ ३०॥

भवद्भावं विजानन् विधिर्दीर्ष्यां न विजह्यात्, तर्ह्युक्तया नीत्या दुःखमापादयेदेवेति चेदाह—

तम एव विराय संस्तुतं प्रतिपद्येत शनैः प्रकाशताम्।
सुतरां मधुरायते स्वयं स च तिक्तः परिशीलितो रसः ॥३१॥

एवकारो विरोधे, यथा "स्मर एव तापहेतुः" इत्यादौ। एवं चकारोपि। संस्तुतं परिचितं, चिरानुभूतमिति यावत्। स्वयं विना रसान्तराधानप्रयत्नम्। अप्रस्तुतप्रशंसाद्वयम्। अतो भाविनि काले दुःखमपि सुखत्वेन भायादिति ॥ ३१॥

तमस्तिक्तावभान्तस्य न विपरीततया भासेते। जीवितन्तु सुखापेक्षयाऽधिकदुःखदायीति विषमौ दृष्टान्तावित्याशयेनाह—

अविमुक्तगुभशुभे दधत् सततं श्रान्तिदमेव जीवितम्।
भुवने भ्रमति क्षपाकरो दिवि पक्षद्वयसंयुतो यथा ॥ ३२॥

अवियुक्ते अन्योन्यनियतसहचारिणी, शुभशुभे, दधत् स्वप्रयोजकतया स्वप्रयोज्यतया च धारयत्, जीवितं जन्मिनां सततमविच्छेदेन तत्र तत्र प्रवर्तकत्वेन श्रान्तिदमायासदाय्येव सद् भुवने भ्रमति संसारितामविरमयद्वर्तते। श्रान्तिमध्यगस्य सुखलेशस्याऽप्यविगणनीयतेत्यभिप्रायेणैवकारः॥ अत्रोपमा — क्षपाकर इति। भ्रमतीत्यनुषङ्गः। सञ्चरतीत्यर्थः॥ ३२॥

तर्हि दुःखनिवृत्तिर्नभःपुष्पकल्पेत्यत आह—

गहनेषु परं निमज्ज्य वा मुहुरुन्मज्ज्य सुखासुखोर्मिषु।
सुचिरेण तु मोहवारिधेर्विवशः पारमुपैति चेतनः॥ ३३॥

गहनेषु अज्ञानहेतुषु, अगाधेष्विति च। परं नितराम्। इदमुन्मज्ज्येत्यत्र, मुहुरित निमज्ज्येत्यत्र च सम्बध्यते अकिञ्चनप्रादेशिकोपकरणवत्। सुखासुखोर्मिष्विति रूपकमेकस्मिकत्वेन दुःसहतां व्यनक्ति। उन्मज्जन निमज्जने प्रस्तुते विविधानुभवरूपे। विवशः भाविनस्तादृशस्यानुभवस्य चिन्तया क्लिश्यन्। चेतनस्तन्निवृत्त्युपायं विजानन्। दुस्तरत्वेन मोहात्मकाद्वारिधेः। सुचिरेण सत्त्वशुद्धज्ञाननिष्ठाकर्मन्यासक्रमेण। उपैति तु प्राप्नोत्येव। खननेन तथा दृष्टत्वात्। अतो ममाऽपि नाऽसुलभा दुःखनिवृत्तिरिति॥ ३३॥

तस्यामभिलाषमुत्पादयतः क्लेशस्य दातारं विधावीर्ष्यां त्यजन्ती मनुते—

अधिरोपयितुं शरीरिणं सुखदुर्गं दययैव सुस्थिरम्।
अपि कोऽपि भुजः प्रचोदयत्यनुवेलं व्यथया हि पद्यया॥३४॥

सुस्थिरं निरपायम्। अनिष्टदुष्प्रवेशत्वात् सुखमेव दुर्गम्। उक्तस्वरूपस्य सुखस्याऽपवर्गत्वमुक्तम्। दययेति विधेः सूनाशान्तिरुक्ता। कोऽपि अचिन्त्यमहिमा। भुजः, प्राप्यबोधकत्वादिना विधिर्निगीर्यते। व्यथया

पद्यया क्लेशमुपायं मध्येकृत्य। द्वियुक्तरूपकेणाऽनन्योपायत्वं बोधितम्। एकदेशविवर्ति सावयवं रूपकमप्रस्तुतप्रशंसा च ॥ ३४ ॥

निश्चतेऽभ्युदयोपाये कुतश्चिन्तामथिता भवती भवतीति शङ्कामप्रस्तुतं सामान्ये विन्यस्याऽपाकरोति—

उपयाति शुभेऽपि मानसं विपदित्येव विशङ्क्य भेष्यति।
कृपया परिलाल्य पोषितुं गृहीतो विहगश्चसन्निव ॥३५॥

उपयातीति वर्तमानसामीप्ये भविष्यति शत्रन्तात् सप्तमी। अपीति शुभोदयानवरदाशङ्कयोर्विरोधे। मानसं शङ्काशीलम्। भेष्यति उद्वेगमेष्यति निष्पन्नस्यापि कृपस्य भाविनमनुभवमादाय कृपो भविष्यतीतिवदयं प्रयोगः। विवेचनवैचुर्यमुपमया गम्यते। अतश्चिन्तामथिता भवतीति "या तु व्यसनसम्प्राप्तिः स निरोध" इति लक्षितो निरोधोऽङ्गम् ॥ ३५ ॥

इदमनुभूतान्तरोक्त्या द्रढयति—

विशशमकरोत् स लक्ष्मणो नृवराज्ञामिह मामपासितुम्।
सहसा भुवनं तमोऽवृणोदपतं वज्रहता हता ह्यहम् ॥ ३६ ॥

सः अयमानुवर्त्ती। नृवरस्याऽलङ्घ्यशासनस्य। इह वने। सहसेत्यादिना मोहावस्थोक्ता। हता विपर्यस्तभाग्या। वज्रेण असम्भावितनिरतिशयक्लेशदायिना हता। हता हतेति शब्दशक्तिमूलविरोधध्वनिः विष्टपेषणावतशक्यत्वात्। ह्यहमिति खानुसन्धाने। अहमशरणा। स्मृतिर्भावः। इतः प्रभृति षट्सु सोपपत्तिशमहेतूपन्यासात्मा "उपपत्तिकृतो योऽर्थ उपन्यासस्तु" इति लक्षित उपन्यासोऽङ्गम् ॥३६॥

तदानीन्तनं दुःखातिशयमनुसन्दधाना प्राह—

स्वहृतौ न मनो धृतं हिते मरणे वा सम गर्भचिन्तया।
व्रणजेतु किणे पुरा पुनः क्षतमेत्याऽध्वतिविह्वलाऽभवत्॥३७॥

हिते दुःखपरिहाररूपेष्टसाधके। अप्यर्थकवाशब्दोऽत्र योज्यः। मरणे विषये, तदर्थमिति यावत्। इष्टार्थमालम्बितमनिष्टार्थमभूदित्याह— व्रणजे त्विति। अपिनुशब्दावुक्तं विपरीतं सूचयतः ॥३७॥

अतिविह्वलात्वनिवर्तकत्वेनेष्टमुपायं स्मरति—

अभितप्तमृते गतिं मनो मम नोन्मादमवापदाकुलम्।
यदिवाऽभ्यलषं ततो धुरामसितुं ग्रन्थिमपोह्य मे शुचः ॥३८॥

गतिमभितापनिवृत्त्युपायम्। मया शिथिलबन्धं भारमिव दुर्वहं तापं सोढुमसमर्थया तान्नवृत्त्युपायान्तरमजानत्या यद्यप्युन्मादोऽभिलषितस्तथापि नोदभूदित्यर्थः ॥३८॥

तदिच्छाया अनर्हतां सिद्धान्तयति—

अथवा द्विगुणां व्यथां ददत् स गदो बाढमनागतो वरम्।
करणक्षतिमेत्य चेन्नृणां मरणं स्यादपि जीविताद्वरम् ॥३९॥

अथवेति कथयिष्यमाणस्य सहेतुकत्वेन सम्यक्ता सूचिता। द्विगुणामभ्यधिकाम्। वरं मनाक् प्रियम्। करणस्य चित्तादेः क्षतिं स्वफलनिर्वाहासामर्थ्यम्। अयं भावः— वर्तते खल्वापिपीलिकं न न भूयासम्, किन्तु भूयासमिति मृतौ द्वेषो जीविते चाशा। भोगसाधनस्य चित्तादेः क्षतौ तु आशाद्वेषयोर्विपरीतविषयकत्वमर्हम्, तयोर्विषयाऽसिद्ध्याऽतिक्लेशकरत्वात्। अतस्तादृशो जीविताद् भोगविरतिकारणं मरणमीषत् प्रियम्। अतिदुःखदस्य तून्मादस्याऽनुत्पादस्ततोऽपि प्रियमिति। उक्तक्रमाऽभिप्रायेणापिशब्दः ॥३९॥

अथेत्थं सुखकामनया प्रवृत्तिर्दुःखायेति मत्वा दत्तहस्ताऽरूढनिर्वेदाभयस्थाना प्रागङ्कुरितपुष्टान्तस्तुष्टिर्निर्गीतमनुसन्धत्ते—

कलये वनमर्कटाय तां नहि दातुं गुणपुष्पवाटिकाम् ।
नहि चालपितुं वनानिले वहति च्छिद्रितवेणुवत् स्वयम् ॥४०॥

मर्कटायेति चापल्यातिशयान्मनसा निगरणम् । जनेन पोष्यमाणस्य तु स्यादपि विवेकस्येति वनेति । तां ह्रदयतया भान्तीम् । गुणा एव लोभनीयत्वेन पुष्पाणि तेषां वाटिकेति जिजीविषानिगरणम् । दातुमधीनीकर्तुम् । नहि कलये नैवाऽध्यवस्यामि । अत्र अन्वयेनोपमां गम्यां विधाय व्यतिरेकेण तां वचसां विधते—नहीति । कलय इत्यनुषङ्गः । स्वयं बुद्धिपूर्वम् । आलपेऽनियतकालिकत्वं व्यङ्ग्यम् ॥ ४० ॥

कुतस्तवेयं मतिर्जाता ? तत्राह—

मनुजस्य नहीतरो गुरुर्नहि बन्धुश्च परस्तथैव, यः ।
प्रददाति विदां शुभव्रतं विदधातीह यथा व्यथाक्षमे ॥४१॥

इह दुःखप्रचुरे लोके । व्यथाक्षमे इतीतरेतरयोगद्वन्द्वो मिथःसहचारिताव्यञ्जकः । विदां विवेकम् । शुभव्रतमिष्टसाधकमनिष्टवारकञ्च । यथा प्रददाति, मनुजस्येत्यनुषङ्गः । कापवरस्य ददातिवत् षष्ठी । इतरः, अर्थाद् व्यथायाः । गुरुरज्ञातज्ञापकः । नहि नास्त्येव । क्षमायाः परः । बन्धुः कुशलानुकूलः । व्यथानुभवादेव नरः कृत्याकृत्ये विविच्य कृत्यं करोति, क्षमया लोकह्रद्यो भवति चेति भावः । अत एव व्यथाक्षमे इति द्वन्द्वे क्रमः । अत्र विदधातीत्यस्य द्विवचनान्तविपरिणामः । ४१ ।

अकर्त्तव्याकरणेन जातं फलमनुसन्धत्ते—

असजद्यदघे न मे मनो मृतिमन्विष्य तु, भाग्यमेव तत् ।
अत एव कुलस्य भावुकं परिपाको मम चाभवत् फलम् ॥४२॥

खनिष्ठे कर्तृत्वे मनस्यारोपितं खस्य पारतन्त्र्य तस्य स्वातन्त्र्येच्च गमयति । मृतिमन्विष्य तामिष्टतया गृहीत्वा । अधे पापप्रयोजिकायां खहतौ नासजत् ।

तदर्थं न प्रावर्त्तत । तद् अप्रवर्त्तनम् । भाग्यम् इष्टसम्पादकम् । किमिष्टम् ? तत्राह-अत एवेति । खलत्यर्थमप्रवर्त्तनादेव । कुलस्य पतिवंशस्य, भावुकं श्रेयस्करं फलमभवत्, सन्तानानुच्छेदादिति । परिपाकः क्लेशप्रयुक्तः शमश्च अत्र खलत्यर्थमप्रवृत्तः फलविशेषकथनरूपं पुष्पमङ्गम् । तच्च शमं फलमभवत् । पोषयति ॥४२॥

अविवेकेन वृतायाञ्च हतौ प्रसक्तमनिष्टं विचिन्त्य सोढुमसमर्थो परामृशति—

अविषह्यमिदं, घनावृते सतमिस्रे हृदयाङ्गणे मम ।
शलभा इव वर्षजा मुहुः पुरुचिन्ता उदयन्ति वृन्दशः ॥४३॥

इदं घनावृत इत्यादिनोद्यमानम् । घनेन निबिडमेघेन तमोगुणेन च आवृते आच्छादितेऽभिभूते च । सतमिस्रे अन्धकारिते कृत्यनिर्णयानिपुणे च हृदयाङ्गणे अजिरतुल्ये मनसि । मुहुरुत्तरोत्तरम् । वृन्दशः बहुसङ्खरूपेण । उपमयाऽविच्छिन्नत्वज्ञाटित्यादि चिन्तासु गम्यते । चिन्तावस्थानुसन्धानान्मतेरतिरस्कारो बोध्यः । अनुभवे रूक्षार्थविषयकत्वप्रतिपादकमिदं वज्रनामाङ्गम् ॥४३॥

पुरुचिन्तानामसम्भाव्यताशङ्कां सोपमं सहेतुकञ्च निरस्यति—

विगते कथमप्युपेक्षणे स्मृतिधारा हृदये स्फुरेदपि ।
शिशरेऽपगते नवोदिता लतिकायामिव सूनमञ्जरी ॥४४॥

उपेक्षणे स्मृतिप्रतिबन्धके विगतेऽपगते । स्मृतिधारा सजातीयपूर्विका स्मृतयः । स्फुरेदपि । अर्हार्थे लिङ् । उत्पत्तुमर्हतीवेत्यर्थः । उपमया पूर्वोत्तरकालिकमत्यन्तवैलक्षण्यं हृदयस्य व्यज्यते ॥४४॥

अथ कतिभिश्चिद् विषयनिरूपणेन पुरुचिन्तां विवृण्वती तन्निदानं त्यागाभावेदयन्तं लक्ष्मणं स्मरन्त्याह—

कृमिवत् स्फुरतोर्भ्रुवोः शिरः स्वभुजाभ्यामवलम्ब्य सव्यथम् ।
विरहासहमास्मराम्यहं विसृजन्तं नयनाम्बु लक्ष्मणम् ॥४५॥

कृमिवत् स्फुरतोः सतोः । स्फुरणस्याविच्छिन्नत्वानिवार्यत्वादि गम्यते । सव्यथं भाव्यनिष्टाचिन्तासहितम् । आलम्बान्तरविरहात् स्वभुजाभ्यामिति । ग्लानिदैन्यावेगादयो लक्ष्मणगता व्यज्यन्ते । आ कृत्स्नविषयं स्मरामि । आ इति खेदे वा । लक्ष्मणं "रामं दशरथं विद्धि मां विद्धि जनकात्मजाम्" इति मात्रोपदिष्टपूर्वम् स्वभावोक्तिर्भाविकञ्च । इतः प्रभृति एकादशाधिकशततमान्तश्लोकैर्मुखप्रतिमुखाभ्यां रूढयाऽपि चिन्ताफलस्य शमस्य लक्ष्मणवाल्मीकितापसीनागारावस्थाचिन्तारूपप्रतिबन्धकसमापातादाशङ्कनीयापकर्षतां प्राप्तस्य परामर्शात्मा गर्भसन्धिः । तत्र लक्ष्मणवृत्तान्ते च्छलाधीनव्यापारपरामर्शद्वारा निर्वेदमन्युपयोगि अभूताहरणं नामाङ्गमत्र ॥४५॥

मतिमान् दृढभक्तिरग्रजे पृथुशक्तिः स्थितधीः स तादृशम् ।
यदखिद्यत, तद्विलोक्य मे हृदयादर्धमयादिवामयात् ॥४६॥

मतिमान् विवेकी । अत एव दृढभक्तिः । "दृढभक्तिरिति ज्येष्ठे" इतिवदयं प्रयोगः । स्थितधीः अत्यालब्धव्यवसायः । पृथुशक्तिः ऊरीकृतनिर्वहणसमर्थः । विलोक्य, स्थितायां इति शेषः । तेन ल्यपः साधुता । आमयादित्यन्तर्भूतविभागक्रियापादानत्वात् पञ्चमी । समुदायरूपादामयादुःखादर्धमयात् । इवेति प्रतीतौ यथा दूरं तिष्ठन् देवदत्त इवेति । संविभक्तं हि दुःखं सह्यवेदनं भवतीति भावः ॥४६॥

असन्निहितमपि तं भावनावैभवाद्योगी ध्येयमिव साक्षात्कुर्वतीव सप्तभिः—

अवसः सविषेऽनघो हि नौ पुरकान्तारभिदामिति विना ।
असहा विनयार्हमाननं तव विस्मर्त्तमतोऽस्मि देवर ! ॥४७॥

हीति निश्चये निश्चितानघत्ववानित्यर्थः। तज्ज्ञापकमाह—पुरेत्यादि। असहा अशक्ता। विस्मरणाशक्तत्वे हेतुः—विनयार्द्रमिति। तत्र हेतुः—देवरेति ॥ ४७ ॥

स्वसुखनरभिलाषे तत्तादृशे कृतज्ञतां प्रकटयति—

गिरिकाननकान्तिमश्नतोर्दिवसा उत्सविनो हि नौ गताः।
अरिभीषण! सोढया त्वया परिचर्याव्रतनिष्ठयैकया ॥४८॥

अश्नतोः यावद्भिरिन्द्रियैरनुभवतोः। उत्सविनः प्रतिक्षणप्रवर्धमाननियतसुखजनकाः। गताः न गामिताः। एकया इतरासाधारण्या परिचर्याव्रतनिष्ठया अनिर्विण्णशुश्रूषाव्रतेन। तत्र सामर्थ्यं गमयन्तौ सम्बुद्धिरिति भीषणेति ॥ ४८ ॥

भ्रातृत्यागात्यागेनाऽपराधीति मा शङ्किष्ठाः, मदीयदुष्कर्मपरिपाकनिमित्तत्वात्तस्येत्याह—

अजहाद् गहने पुरा कटूक्तं न वाचो निशमय्य मां भवान्।
अथ मां प्रति ता निशम्य मां कुटिला कर्मविपाकपद्धतिः ॥४९॥

कटुवाचः श्रीरामायणे द्रष्टव्याः। अथ कालान्तरे। अत्र अजहाद् भवानित्यनयोरनुषङ्गः। उक्तमन्येनाऽपि—"जनो हि यः कर्म करोति तादृशं समश्नुते तादृशमेव तत्फलम्" इति। न चेदमसम्भाव्यमित्याशयेन समर्थयते—कुटिलेत्यादि। कुटिला वक्रा दुर्विज्ञेया च। पद्धतिरित्यवर्जनीयत्वं कर्मणो व्यज्यते ॥ ४९ ॥

कटुवाङ्मर्षणं प्रार्थयते—

अविचिन्त्य मयोदितं क्रुधा दयया देवर! मृष्यतां वचः।
अनियन्त्रितमेति यैः क्वचिन्न मनस्ते नहि सन्ति कापथाः ॥

मर्षणे हेतवः अविचिन्त्य, कृत्वा, दयया, देवर ! इति । एकस्याऽपि तत्र हेतुत्वे बहूनां तत्त्वमनिवार्यमिति भावः । कृतपूर्वामुपकृतिं कुतो विस्मरन्ता चुक्रोध ? तत्राह— अनियन्त्रितमिति । अप्रतिबद्धमित्यर्थः । यैरिति मानसविषयाणां करणत्वेन साधकतमत्वमुक्तम् । कुत्सिताः पन्थानः कापथाः । पथिशब्दो विषयेषु लाक्षणिकः । अस्य समर्थकः कुटिलेत्याद्यर्थान्तरन्यासः ॥ ५० ॥

सौभ्रातृतिशयं स्मरन्त्याह—

विपुलेषु महावनेषु यो विरहात्तर्या परिशुष्क एककः ।
व्यवरद्रघुनायकं हि तं परिचर्योदधरत् कुलं भवान् ॥५१॥

विपुलेषु महावनेष्विति परिचर्यायाः कृच्छ्रत्वं तस्यामनिर्वेदश्चोक्ते । परिशुष्कः द्रष्टृणामपि शोकदायीत्यार्त्तेराधिक्यम् । एककः स्वदन्यसहायशून्यः । लक्ष्मणविशेषणं वेदम् । तेन विश्रान्त्यलाभो गम्यते । रघूणां नायको मुख्यः । नायकशब्दशक्त्या रघुषु मालारूपत्वं रामे मध्यमणित्वं तेन सर्वथा रक्षणीयत्वञ्च ध्वन्यते । लक्ष्मणे उदात्ततातिशयः ख्यापितः ॥ ५१ ॥

न केवलं ज्येष्ठे भ्रातरि, किन्तु तत्पत्न्यां मय्यपि तत्तादृशी भवितरित्याशयेनाह—

श्रुतमिन्द्रजितं सुदुर्जयं प्रतियातः समिति त्वमित्यहो !
सहसैव यदा, तदाऽविदं प्रियतायास्त्वयि मेऽप्यगाधताम् ॥

इन्द्रजितमिति दुर्जयत्वोपपादकम् । अहो इत्यविज्ञातपूर्वस्य निश्चयाद्विस्मये । सहसैव स्वप्राणानपि न तृणाय मत्वा प्रतियातः । त्वयि त्वन्निष्ठायाः । मे भ्रातृजायायाः । वैषयिकाधिकरणस्य सम्बन्धित्वेन विवक्षया षष्ठी तस्य दुरुच्छेद्यत्वं व्यनक्ति । अगाधतामपरिच्छेद्यताम् ॥ ५२ ॥

तादृश्याः प्रियतायाः देवरत्वस्य चोचितामिदानीन्तनीं प्रवृत्तिं निर्धारयति —

मुनिदर्शितवत्सकौ मम स्वयमाश्लिष्यसि वत्सलोऽद्य वा ।
अनसूयकपावनं मनः प्लवते ते प्रमुदापगोर्मिषु ॥५३॥

मुनिना कुशलकाङ्क्षिणा । दर्शितौ मत्पुत्रत्वेन बोधितौ वत्सकौ चिरकाङ्क्षालब्धौ । मातापुत्रान्यतरानेयत्वविरहचिन्तया अनुकम्पायां कः । मम निरतिशयत्वद्भावैकभूमेः । स्वयमिति अपरिचयेन तयोराश्लेषेऽप्रवृत्तेः । अद्य अस्मिन् सुदिने । वेत्यवधारणं आश्लेषान्वयि । अनसूयकं मत्प्रीत्याभिनन्दनशीलम् अत एव पावनं स्वसङ्गेनापि शुद्धिकरम् । प्रकृष्टा मुदेवाविच्छिन्नप्रवृत्तत्वादापगा । ते स्वसुखनिरभिलाषस्यऽपि ॥ ५३ ॥

देवरस्य स्नेहप्रवृत्तिं विचिन्त्य तरलचित्ता सती ततो निवृत्तिं काङ्क्षन्त्याशिषं प्रयुङ्क्ते—

अयि देवर ! मुञ्च मत्कथां, सुचिरं ज्येष्ठनृपैकबान्धवः ।
गुणिभिः सहितः स्वबन्धुभिर्विगताधिर्जय जीव मङ्गलम् ॥

मुञ्च मत्कथाम्, सा न केवलं मे. किन्तु तवापि खेददा, अतस्तद्विस्मरणमेव शोभनमिति । तत्रोपायमुपदिशति—सुचिरमिति । ज्येष्ठेति युक्तत्वम्, नृपेत्यपेक्षितत्वम् एकेतीतरानर्हत्वञ्च बान्धवत्वस्योक्तम् । गुणिभिः स्वबन्धुभिरित्याधिविगमप्रयोजनोक्तिः । जयेत्यादौ आशिषि लोट् । मङ्गलं ससुखम् । जीव माऽहमिव त्यक्तजीवितो भवेति ॥ ५४ ॥

देवरात्तित्तं निवर्त्य तस्मिन् दृष्टिपथं व्यतीते स्वानुभूतां मूर्च्छावस्थामनुसन्दधाति—

अपनीय सुषुप्तिबोधने अपवार्याऽप्यखिलेन्द्रियाणि मे ।
कलये व्रणिते हृदि स्त्र तां नवमूर्च्छामिव रोपणौषधीम् ॥५५॥

अपवार्य, अपनीय सुतामिति योजना। मुखं व्यादाय स्वपितीतिवदयं प्रयोगः। सुषुप्तिं सौषुप्तंसुखात्मानन्दानुभवम्, बोधनं जायत्कालिकं विषयाधीनबोधञ्च। व्रणिते दुःखातिशयदन्तुरे। हृदि बाह्येन्द्रियप्रवर्त्तके। सुतां ततः प्रवृत्ताम्। नवामननुभूतचरीम्। मूर्च्छाम्। रोषणौषधीसाम्यकथनेन मूर्च्छाया अनिष्टावेदकत्वाभावो व्यञ्जितः। अस्मिन्ननन्तरे च पद्ये तस्या अतिशय-कथनात् "यत्सातिशयबद्वाक्यम्" इति लक्षितमुदाहरणमङ्गम् ॥ ५५ ॥

सा सुखदायिकाऽप्यभूदित्याह—

गणिता दुहिता मृतेरिति स्थितिरेषा भयदापि देहिनाम्।
दहता हृदयेन मर्दितान् सुतरां सा सुखयेत् सुशीतला ॥५६॥

मृतेर्दुहितेति गणितेति। चैतन्यमज्जनान्मरणापुत्रीत्वेन सम्भावितेत्यर्थः। एषा मूर्च्छातिर्मूर्च्छा। दहता अतिशयितं दुःखमनुभवता। मर्दितान् क्लेशितान्। सुशीतला जाड्यातिशयं जनयन्तीत्युपचारेणोक्तिः। शीतलं हि दाहनिवर्त्तकम् ॥ ५६ ॥

तात्कालिकीं स्वचित्तावस्थां परामृशति—

दयितं प्रति रोषमन्तरा भयलज्जाविकृती विहाय च।
इयमेत्य तमोहृदं तदा स्वयमस्थादवमज्ज्य मे मतिः ॥५७॥

त्यागाद्रोषः, एकाकिनीत्वाद् भयम्, अपवादचिन्तया लज्जा च प्रसज्यन्ते। तन्निवर्त्तिकेयं मूर्च्छेति भावः तमोऽज्ञानमेव दुरवधारणीयत्वादिना हृदम्। अवमज्ज्य। अवमज्जनेन प्राप्तिर्निर्णीयते। स्वयं विषयसंसर्गं विना। अत्रोत्तरत्र च तत्तदर्थकीर्तनात्मा मार्गोऽङ्गम् ॥ ५७ ॥

सरुजं मम पुष्पतल्पकेऽप्यलसाङ्गं घनगर्भदुर्वहम्।
तदशेत भुवस्तले तदा गतचेष्टं कृमिकण्डकाकुले ॥५८॥

प्रकरणेऽस्मिन् स्मर्यमाणा मूर्च्छावस्था निर्वेदानुकूला मती स्थायिनः शमस्याङ्गत्वेन प्रत्यवेक्षितेति बोध्यम् ॥ ५८ ॥

मूर्च्छानन्तरसुखावस्थामनुसन्धत्ते—

अतिवृष्ठिनिमज्जनाद् भुवो व्यथितायाः शरदागमो यथा ।
निकटं य उपेत्य मे स्थितः, परविद्यानिधिमास्मरामि तम् ।।

यथेत्युपमया झटिति व्यथानिवृत्तिः, पूर्वोत्तरावस्थयोरत्यन्तवैलक्षण्यञ्च व्यज्यते। परविद्यानिधिम् आत्मवित्तममिति तत्सन्निधेरपि सुखदत्वमुक्तम्। तं निषादविद्धाण्डजदर्शनेनापि प्रोद्भूतकरुणम् ॥ ५९ ॥

करुणोचितां तद्वाचमनूद्य सुखदतां प्रकटयति—

दुहितः ! सविधे ममाश्रमः, सुखमायाहि, गृहं तवैव सः ।
ऋतमेवमुदीर्य मन्मनः पितृबन्धुर्निरवापयन्मुनिः ॥६०॥

दुहितरिति सम्बुद्धिरादौ निर्वापणे नितरामुपकरोति । सुखमायाहि, त्यक्त-शोकमागच्छ । आयानं ते सुखजनकञ्च भविष्यतीत्यभिप्रायेण वेदम्। साध्वी नाहं परगृहमावसामीति चेदाह—गृहं तवैव स इति । ऋतमेवेति यथोक्तमनुभूतत्वात्। पित्रोर्जनकदशरथयोर्बन्धुः। तथाच कथमयमाश्रमः परकीय इति भावः। निरवापयद् निर्व्यथं व्यधात् ॥ मुनिरिति तत्त्वदर्शिन इयमुक्तिर्युक्तेति साभिनन्दनं वचनम् ॥ ६० ॥

मुनेः परविद्यानिधितां तद्वाचैव प्रकटयति—

जगदस्ति मरीचिकेव, सा ध्रुवशान्तिस्तु गतिः परेत्यपि ।
सदयं हृदयङ्गमां गिरां गतिमालम्ब्य महर्षिरब्रवीत् ॥६१॥

जगद् दृश्यजातम्। अस्ति सत्त्वेन भाति केवलम्, नतु पारमार्थिकम्। अत्रोपमा -मरीचिकेवेति । अनुपादेयत्वं गम्यम्। ध्रुवा अनपायिनी । शान्तिः क्लेशनिवर्त्तकः शमः। गतिरालम्बनम्। हृदयङ्गमां भावना-धायकबोधजनिकाम्, फलसंवादेन हृद्याञ्च। गतिं रीतिम्। महर्षिरासुतमः। अनयोः प्रस्तुतशमोपयोगिसान्त्ववचनात्मा सङ्ग्रहोऽङ्गम् ॥ ६१ ॥

तपोवनस्य सुखदत्वमाहार्येण सन्देहेन कथयति—

अपि दग्धमहावनान्तिके लसितं शीतलजीवनं सरः ? ।
सुतरां तुमुलस्य वारिधेरथवा शान्तिकरं तपोवनम्? ॥६२॥

शान्तिकरं दुःखनिवृत्तिसुखसम्पत्तिनिदानम । सन्देहस्तूल्लेखसङ्कीर्णः । शान्तेः शीघ्रत्वाकस्मिकत्वादि गम्यम् । सामान्येनोक्तिः श्रीवाल्मीक्याश्रमे पर्यवसयति । लिङ्गादभ्यूहनमनुमानमङ्गमत्र ॥ ६२ ॥

अथाष्टभिस्तपोवनस्य शान्तिकरत्वप्रयोजिकाः खालम्बनीभूतास्तापसीर्विशिनष्टी स्तौति—

मलिना किल धूम्यधैर्य्या नहि यासां मुखभाः क्वदापि, ताः ।
विलसन्तु मुनीन्द्रयोषितः शमसौम्याश्रमरत्नदीपिकाः ॥६३॥

किलेति प्रसिद्धौ। ईर्ष्यया धूम्यात्वरूपणं मुखभासि दीपप्रकाशत्वगमकम् । मलिना दुष्टा कज्जलवती च। शमेन शान्त्या नेत्राप्रतिहत्या च सौम्याः सोमवत् प्रियदर्शना आश्रमस्य रत्नदीपिका अनिर्वापणीयप्रकाशवत्यः । मुनीन्द्रयोषत्सु उत्कर्षपर्यवसायी व्यतिरेको व्यज्यते । विलसन्तु अविच्छिन्नशोभं वर्त्तन्ताम् । पौनरुक्त्यपरिहारस्तु गूढं गम्यते । तापसीष्वाराध्यत्वप्रतीतेर्भक्तिः, आशिषा हर्षः, प्रकरणायत्ता मतिश्च शमं पोषयन्ति । तापसीप्रशंसापरेऽस्मिन् प्रकरण इष्टार्थोपायानुसरणात्मा आक्षेपोऽङ्गम् ॥ ६३ ॥

शमफलं प्रणिसामान्येऽप्येकाकारस्नेहात्मकं मुनिधर्मं तासु सम्पन्त्याह—

तरुपक्षिमृगेषु मानुषेष्वपि देवेषु समं सदैव ताः ।
हृदये कलयन्ति यं तु, तं सरलस्नेहरसं स्मराम्यहम् ॥ ६४॥

संसारिणां तरुवादिषु सम्भवत्तारतम्यं स्नेहं हृदि निधायैं क्रमः । देवेष्वपि. किम्पुनरन्येष्विति अर्थापत्तिः प्रमाणम् । सदैवेति अतिपरिचयादवज्ञोत

नीतैरपवादः। हृदय इति बहिः प्रकाशनेऽव्ययतोक्ता। तमेकाकारम्। सरलं निष्कृतिकामनाशून्यम्। स्नेहरसं रस्यमानम् आनन्दमयतयानुभूयमानं स्नेहम्। स्मरामि, अविच्छेदेन। अहं व्रणितान्तःकरणापि किं पुनरितर इति भावः ॥ ६४ ॥

तासां स्वोपयोगिष्ववैषम्येण वर्त्तनेन ज्ञाप्यं स्थितप्रज्ञत्वं मुनिधर्ममनुसन्धत्ते—

वनशैलभुवो हुताशनः सविता सोम इति त्रयीति च।
न मनो भ्रमयन्त्यमीषु याः, सुदृढास्तिक्यवतीः स्मरामि ताः॥

इतीति प्रत्येकं सम्बध्यते। मनसोऽभ्रमणे हेतुः सुदृढेत्यादि। आस्तिक्यमामिमलफलजनकत्वानश्चयात्मिका श्रद्धा ॥ ६५ ॥

तत्स्थितप्रज्ञताप्रयोजिकां ज्ञानवृद्धिं स्तौति द्वाभ्याम्—

श्रुतिवन्महिता महीतले प्रथितात्मान ऋषिप्रसूतयः।
विहिताविहिते दिशन्ति या रुचिराचारनिदर्शनैः स्वयम्॥ ६६॥

महीतल इति महनीय सार्वत्रिकत्वम्, श्रुतिवदित्यनाशङ्कनीयाप्रामाण्यवत्त्वञ्चोक्तम्। प्रथितात्मानादिद्वयी उपमासाधारणधर्मोक्तिः। संसर्गमात्रेणापि पावनीकरणं व्यङ्ग्यम्। दिशन्ति उपदिशन्ति। रुचिरत्वं मनोरञ्जकत्वम्। स्वयमुक्त्यनपेक्षम् ॥ ६६ ॥

इतिहासपुराणसत्कथास्रुतिमासिच्य सुजीवितावनौ।
वितरन्ति चितं तु चेतनालतिकायां कुसुमं फलञ्च ताः॥ ६७॥

स्रुति स्रुतं पय इत्यर्थः, कृदभिहितन्यायात्। अविच्छिन्नत्वं कथायां गम्यते। चितं सञ्चितम्। कुसुमेनाभ्युदयः, फलेन निश्रेयसञ्च निगीर्यते। वितरणे सम्प्रदानानुक्तेः सर्वोद्देश्यकत्वं गमयति ॥ ६७ ॥

तासां ज्ञानवृद्धिफलं कथयति—

परनिर्वृतिमामनन्ति या दयितानां व्रतिनामुपासनम् ।
विषये वितृषा जयन्तु ताः शुचिरागाः पतिदेवताः शुभाः ।।

परामुत्कृष्टाम् । निर्वृतिमव्यभिचारेण सुखजनिकाम् । विषये बन्धके । जातावेकत्वम् । वितृषा निस्पृहाः । शुचिः स्वसुखानुद्देश्यको रागो यासान्ताः । पतयः देवता उपास्या यासान्ताः । पतीनामुपास्या इति च गम्यते । अत एव शुभा अनुकरणीयशीलाः । जयन्तु अविच्छिन्नोत्कर्षा वर्त्तन्ताम् ॥ ६८ ॥

तासामाचारस्य लोकपवित्रतामाह—

यदि मज्जति कालवारिधौ श्रुतिराहो स्मृतिरेति विस्मृतिम् ।
ध्रुवमेव पवित्रवृत्तिभिः क्षितिरेताभिरुपैति धन्यताम् ।।६९।।

काल एव वारिधौ । मज्जति तिरोधत्ते । विस्मृतिं नष्टताम् । क्षितिः तत्स्थाः सर्वे प्राणिनः । धन्यतां सत्फलवत्ताम् ॥ ६९ ॥

यन्निनां संसर्गादन्येषां यन्नियमादिसम्पत्तिरन्यत्र दृष्टपूर्वा । अत्र तु तासां संसर्गात् यन्निनां सा दृश्यत इति प्राशस्त्यातिशयं सविस्मयमाह—

इह तैर्वनितावतंसकैः सह सङ्गात् करुणामृतोत्सकैः ।
अवियुक्तविरक्तिकर्कशा अपि सार्द्रा यमिनो भवन्ति ते ।।७०।।

करुणैवामृतं सन्तर्पकत्वात् , तस्यात्सकैः उत्पत्तिस्थानैः । वनितावतंसकैरलङ्कारभूताभिः स्त्रीभिः । सार्द्राः करुणाशालिनः । अपिः कर्कशत्वार्द्रत्वयोर्विरोधे । अतो युज्यते स्वस्यापि शमसम्पत्तिरिति हृदयम् ॥ ७० ॥

अत्रार्थे कुलपालमेव वाल्मीकिं दृष्टान्तयति—

भुवनं शुभशंसनैर्लघूकुरुते यो गुरुभिर्महाकविः ।
दयते स्म यते मुनिः पतन्मिथुनादेकमवेक्ष्य भारितम् ।।७१।।

शंसनैरिति "अनुशतिकादीनां चे"ति शीलार्थे युच् । भुवनं तत्स्थान् सर्वान् । लघूकुरुते सत्त्वगुणकार्यैर्लाघवकार्यं यत्सुखं तद्वत्कुरुते । गुरुभिः

पूजनीयैः। अत्र शब्दशक्त्या विरोधध्वनिः। महाकविः वर्णनी हृदय-संवादवान्। दयते स्मेत्यादि। वृत्तान्तोऽयं श्रीरामायण आदौ द्रष्टव्यः ॥७१॥

तासां सङ्गात् स्वस्यापीर्ष्यापगमं शमञ्च विचिन्त्याह—

अवकाशमसूभिरेव मे सहवासाय तदाऽतनिष्ट यः।
ऋणवत्यहमस्य दुर्विधेर्भिषजः शल्यकृतः पटोर्यथा ॥७२॥

अवकाशमवसरम्। एवकारः पौरनारीव्यवच्छित्तिः। मे ध्वस्तालम्बायाः। तदा त्यागानन्तरकाल एव। शल्यं दुःखातिशयं करोति, शल्येन शस्त्र-विशेषेण कृन्तति छिनत्तीति च, तस्य। पटोः असम्भाव्यसम्भावकस्य, भैषज्यसमर्थस्य च ऋणवती कृतज्ञा ॥ ७२ ॥

तापसीविरुद्धशीलानां पौरीणां सङ्गस्यानिष्टकरतां बोधयन्ती ताः कुत्सयति—

सततोद्यदतृप्तकामनाज्वलनस्येन्धनमेव याः स्त्रियः।
नगरे दधति स्वजीवितं स्वयमङ्गारमथापि भस्म ताः ॥७३॥

सततमुद्यन्ती प्रवर्धमाना अतृप्ता अलम्भावशून्या कामना भोगतृष्णा, सैवाऽश्रयनाशकत्वाज्ज्वलनस्तस्य। स्वेति स्वयमिति चाभिमृश्य धारितातिशयं व्यनक्ति, यदेव रक्षणीयम्, तदेव नाशयतीति। अथापीत्यन्यतरावस्था-प्राप्तिनैयत्यमाह। रूपकाभ्यां कलङ्कितत्वागणनीयत्वादि ध्वन्यते ॥ ७३ ॥

उक्तदोषानुबन्धीनि तासां दोषान्तराण्याह—

परागर्हणमभ्यसूयनं तृषितं दुर्व्यतियानवासना।
इति चैभिरुपासितैर्हृता बत! पौरप्रमदापरम्परा ॥७४॥

दुर्व्यतियाने औपपत्यादिके वासना उन्मुखत्वम्। प्रमदाः इतरान् प्रमादयन्ति स्वयं प्रमाद्यन्ति चेत्यन्वर्थनाम्न्यः, तासामपरम्परेति हतात्वस्य सार्वत्रिकसार्वदिकत्वे प्रकटते। खेदातिशयाद् बतेति। हृता अमङ्गलास्पदत्वेन नष्टा ॥ ७४ ॥

परगर्हणादौ हेतुं दर्शयन्ती तासां दुर्विपाकमाह—

निजदोषनिदर्शनाऽदृशः सुजनाचारविधौ विशङ्किताः ।
सरुजां व्रजिनौघकामलाव्यथया ता मृतिमप्यवाप्नुयुः ॥७५॥

निजदोषणां, निदर्शने सहेतुकं ग्रहणेऽदृशोऽसमर्थाः विशङ्किता असाधुत्व-भ्रान्तिमत्यः । व्रजिनौघमेव फलानुभवमात्रोन्नेयत्वेन कामला रोगविशेषः । दुष्परिहरत्वं व्यङ्ग्यम् । तया या व्यथा तया । रुजा तदधीनं दुःखम् । अपीति गर्हायाम् । "गर्हायाञ्च" इति सार्वकालिकलिङ् अवाप्नुयुरिति । स्वापवादकथकस्त्रीषु पर्यवसानादप्रस्तुतप्रशंसा ॥ ७५ ॥

खलतां स्त्रीपुंसाधारणीं सामान्यतः कथयति—

गतभा मणिवन्निषद्वरे कृमिवद्वा हृदयान्तगह्वरे ।
तमसोपहते हि चेतना मलगर्त्ते पिशुनस्य जीर्यति ॥७६॥

निषद्वरे कर्दम मणिवदित्यमलिनस्यापि संसर्गदोषान्मलिनता, गह्वरतुल्ये हृदयान्ते कृमिवदिति दुर्वारता च गम्ये। तमसोपहते मलगर्त्ते इत्युपमान-विशेषणयोः साधारणं विशेषणम् पिशुनस्य दोषैकदृशः । जातावेकवचनम्। पिशुनानामत्यन्तवर्जनीयत्वं गम्यम् ॥ ७६ ॥

पिशुनतां फलमुपपादयति—

अमुना खलु गह्वरेण यत् तृषितोऽयं विषयस्पृहाफणी ।
विषपावकमुद्वमत्यतो निकटस्थैर्नितरां विषद्यते ॥७७॥

यद् अत इत्युभाभ्यामुपपादकत्वलाभः । खलिवति प्रसिद्धौ उपपाद्ये विमतिरसक्तिमपाकरोति । अमुना उक्तरूपेण गह्वरेण । विषयस्पृहैव फणी दुस्सहानिष्टसाधकत्वात् । अत एव नितरामिति । विषमेवऽल्पत्वेऽप्याश्रय-नाशकत्वादिना पावकस्तम् । निकटस्थैः समीपस्थैः उदासीनैरिति च । विषद्यते ॥ ७७ ॥

सम्पन्नानां पौराणां को लाभो भवत्या बञ्चनेन? इति चेद् परदुःखाधीनं स्वसुखमेवेत्याशयेनाह—

वसनानि महाधनानि वा कनकश्रीमणिभूषणानि वा।
असतां वनकूपसंहतिं परितः पुष्पलतावितानकाः ॥७८॥

वाशब्दः समुच्चये संहतिमिति द्वितीया "अभितःपरितः" इत्यादिना। पुष्पलतारूपा वितानाः। कुत्सिताःशोभाधायकाच्छादकाः। विशिष्टानां वसनभूषणानां वितानानाञ्चोपमापरिकल्पिका निदर्शना। असम्भावितानिष्टप्रतिलम्भस्तु गम्यः ॥ ७८ ॥

ईर्ष्यातिरायात् पुनरपि निरूपयति—

मधुरा मधुनोऽपि वाक् परा, हसितं सुन्दरचन्द्रिकासितम्।
हृतपौरहृदुद्धते इमे अतिसन्धाननिशाचरस्पशौ ॥७९॥

सुन्दरं चान्द्रकावत् सितञ्च। हृतेतीर्ष्यागर्भोक्तिः। अतिसन्धानाय वञ्चनाय निश चरस्य पूर्ववञ्चकस्य रावणस्य स्पशौ गूढपुरुषौ। उपमा विशिष्टरूपकमपस्तुतप्रशंसा च ॥ ७९ ॥

पौरवाचोऽतिसन्धानसामर्थ्यं सामान्यतः सङ्गतिरेकमाह—

रथकेतुबलैः शितापुधैरपि दुर्गैर्वरणादिकैर्विना।
निमिषेण हृतप्रलातवत् खलजिह्वाऽखिलवैरिकाननम् ॥८०॥

रथकेतुबलैरिति जातिपरैकवचनान्तानां द्वन्द्वतया न समाहारैकवचनम्। विरोधेऽपिर्विनानन्तरं योज्यः। अतो विभावना। जिह्वा तत्कार्यवचः। दाहात्मकनाशस्य नैयत्यं गम्यम्। अनानाकेति खलवाचोऽलक्तवेऽपि दाहजननसामर्थ्यं सिद्धम्। प्रकरणेऽस्मिन् रोषकलुषभावाविष्करणरूपं तोटकमङ्गम्। उत्तरत्र रामदोषाविष्करणपरे च ॥ ८० ॥

तादृशपौरनिघ्नस्य रामस्य साहसिकतां विचिन्त्य सामयतो निरूपयति—

परतो नृपगाढचिन्तनादपरोक्षीकृतमेव वस्तु यत् ।
सहसाऽप्यपथेन तद्विशन्नुपजापः कुरुतेऽधरोत्तरम् ॥८१॥

नृपाणां प्रजारञ्जनमात्रतत्पराणां गाढं कृत्याकृत्यनिश्चयपर्यवसायि यच्चिन्तनं ततः, परतोऽनन्तरम् , अपरोक्षीकृतं सर्वविदितं कृतम् । एवोऽप्यर्थे । वस्तु तथ्यभूतम् तद् सहसा अपथेन विशन् झटित्यप्रतिविधेयतां प्राप्तः उपजापः अधरोत्तरं विपरीतं कुरुते । पूर्वं यथा कर्तुं निश्चितम्, तदन्यथाकर्तुं निश्चाययतीति यावत् ॥ ८१ ॥

उक्तं प्रस्तुते विशेषे निगमयति द्वाभ्याम्—

सुपरीक्षितशुद्धरागमप्यनुकम्पामपि विस्मरन्नृपः ।
अपबुद्धि निशम्य भाषितं कृपणानामपकर्मसूत्पतेत् ॥८२॥

सुपरीक्षितमग्निप्रवेशनेन । शुद्धं निष्कलङ्कम् । अनुकम्पां गर्भिणीत्वादिचिन्तयोत्पन्नमहीम् । अपिर्विरोधे । अपबुद्धि विवेकशून्यं यथा तथेति निशमन उत्पतने चान्वितम् । कृपणानामगण्यवचसाम् । भाषितं निशम्य अपकर्मसु अकर्त्तव्येषु उत्पतेत् कर्त्तव्यतया निश्चियनुयात् । ॥ ८२ ॥

साहसिकतां रामस्य कारणगुणप्रक्रमन्यायेन समर्थयते—

तनयं प्रदिशेद्वनाय कोऽप्यभिषेकाय निमन्त्र्य सोत्सुकम् ।
अविचार्य जहाति तत्सुतो दयितां दोहदिनीं महावने ॥८३॥

तनयं वंशसन्ततिकरम्। प्रदिशेदिति शक्तौ लिङ्। कोऽपीति तनयत्यागिनो वैरल्यं व्यनक्ति । अविचार्येति पूर्वोत्तरान्वयि । आनुरूप्यप्रत्यायनात् समविशेषोऽलङ्कारः। उपालम्भस्तु व्यङ्ग्यः। अतः एव दयितां द्रोहदिनीम् ॥८३॥

उद्रिक्तया चिन्तया परिवर्त्तमानस्य मनसो खेदं प्रकटयति—

अहह ! स्मृतिमारुतः पुनर्हृदये वह्निशिखां समिन्धयन् ।
प्रसृतः पुटपाकवन्मम प्रसभं हन्ति हतं हि जीवितम् ॥८४॥

स्मृतिरेव मारुतः हृदये तदात्मकेन्धने । वह्निशिखामिति सन्तापो निगीर्यते । पुनः सविशेषं समिन्धयन्, सामग्रीसम्पत्त्या दुर्वारता गम्यते, तदनुरूपोपमा —पुटपाकवदिति । औषधादिपाकाय प्रतिरुद्धोष्माग्निको मृदादिलिप्तः पात्रविशेषः पुटपाकः । हतं हि हन्तीति विरोधः । दुर्मरं जीवितं प्रसभं हन्तीति तत्परिहारः ॥ ८४ ॥

आर्यपुत्रस्येयमविवेकिता न केवलं मे, किन्त्वितरेषामप्यनिष्टमापादयेदित्याह—

इति भूपतिरेव विश्रुतो व्यतियानं स्वयमारभेत चेत् ।
इह धर्मगतेः क्षतिर्भवेदनिवस्यापि सतां क्षितिर्भवेत् ॥८५॥

इति अनेन प्रकारेण । भूपतिरेव, का कथा तत्प्रजानाम् ? । विश्रुतोऽनुकार्यचरितः । स्वयमनिष्टमविचार्य । इह न केवलं कोसलेषु, किन्तु क्षितौ सर्वत्र धर्मस्य गतेः प्रसरस्य । क्षतिफलमाह—अनिवार्येति । सतां धर्मश्रद्धावतामपि । उलूकमध्यपातिपारावतन्यायोऽनेनानुसंहितः ॥ ८५ ॥

रामं निष्प्रणयमाशङ्कते—

मयि सोऽस्फुटयद्विरक्ततामधिलङ्कं निभृतं पुनश्च किम् ?।
स्वपदे हि निधाय कर्दमे प्रकटं क्षालयतेऽद्य राघवः ॥८६॥

अधिलङ्कं लङ्कायाम् । यदि रामो मयि प्रणय्यभविष्यत्, न तर्हि मामग्नौ प्रावेशयिष्यदिति भावः । प्रकटं सर्वविदितं यथा तथा। राघव इति प्रथितयशस्कस्य नितरां विनिपातोऽभिप्रेतः । ललितं निदर्शना वाऽलङ्कारः ॥ ८६ ॥

विश्वसितघातकतां प्रकटयति—

महता प्रणयेन केनचिद् दृढपाशेन वशीकृतां विभो !।
पुनरिष्टपशुं प्रकल्पयत्यबलां पूरुषधीरमानिता ॥८७॥

महता प्रकाशितानुच्छेद्यत्वेन। केनचिद् दुर्निरूपेण। विभो इति खेदाधिक्याद्विधिं प्रति: संबुद्धिः । पूरुषधीरमानिता प्रजाप्रियानुरोधेन दोहदिनीं पत्नीमप्य—

त्यजम् , अहो अहं धीर इत्येवममिमानः । अनयोः कपटेनातिसन्धानरूप-मधिबलमङ्गम् ॥ ८७ ॥

चारित्रशङ्कया त्यागोऽयं त्यक्तारं त्यक्तञ्च प्रदहतीत्याह—

इतरेतररागिणो गृहव्रतबन्धून् सततं सचेतनम् ।
प्रदहत्युपगूह्य या मिथः परिशङ्कास्ति नृणां चितैव सा ॥८८॥

मिथो रागित्वनिश्चायकं गृहेत्यादि । चिता मृतं दहेत्, चारित्रशङ्कारूपा तु सा जीवतोऽपीति व्यतिरेकाभिप्रायेण सततं सचेतनं प्रदहतीति । ना च नारी चेत्येकशेषः । स्वदाहाय प्रवृत्तस्य रागस्य मौढ्यमपारमिति भावः । दहतीति दुःखातिशयलक्षकम् । दुस्सहत्वं व्यङ्ग्यम् । अस्ति उत्पद्यते । उत्पत्तिप्रदाहयोः समकालिकता गम्यते ॥ ८८ ॥

सदुद्देशेनानुष्ठितां स्वपरिणीतिमनिष्टान्तामनुभूय तत्सामान्यं तादृशं परिकल्प्य शोचति—

परिणीतिरतीव पावनी श्रुतिमन्दारमनोज्ञमञ्जरी ।
ददती सुचिरं सुखं स्थिता कियतीमपदधोगतिं क्षितौ ॥८९॥

अतीव पावनी पुरुषार्थचतुष्टयसाधिका । श्रुतिर्वेद एव मन्दारः कल्पवृक्षः, तस्य मनोज्ञा सर्वकाम्या मञ्जरीति परम्परितरूपकेण फलसाधनसामर्थ्यं गम्यते । सुचिरमिति आमुष्मिकस्यापि सुखस्य हेतुत्वात् । कियतीं वागविषयाम् अधोगतिं गर्ह्यताम् । क्षितौ, लोकान्तरे तु न जान इत्याशयः ॥ ८९ ॥

श्रुतिविहितायाः परिणीतेः कथं गर्ह्यता ? तत्राह—

विधिरभ्युदयाय कल्पते, विकलः स्यात् स तु कर्तृदोषतः ।
अहितश्च विरुद्धवृत्तितः, श्रुतिरप्यस्त्यबला निराश्रया ॥९०॥

अभ्युदयायेति "कृत्यापि सम्पद्यमाने च" इति चतुर्थी । स अभ्युदयोद्देश्यको विधिः । तृतीयशेषे । कर्तुरनुष्ठातुर्दोषतो रागद्वेषमोहात्मकत्वा

विकलः पूर्णफलदानासमर्थः। विरुद्धवृत्तितो विपरीतानुष्ठानात्। अहितः अनिष्टफलदाता च स्यात्। तथाच मत्परिणीतिः कर्तुरार्यपुत्रस्य दोषाद्विपरीतफला संवृत्तेति दृष्टान्तानालेनेतरेणापि विहितानि कर्मापण्यनिष्टफलकान्याशङ्क्येरन् नानुष्ठीयेरंश्चेत्यननुष्ठानात्मकापामाण्यं श्रुतीनां प्रसक्तमिति ॥ ९० ॥

रामदोष एव कथं त्वत्परिणीतौ दोषमावहेदिति शङ्कां परिहर्तुमितरेषामदोषतां प्रकटयन्ती रामदोषे परिशेषयति—

अवसाम वनेषु यच्चिरादपराधः किमु ? मामकोऽस्ति तत्।
हतराक्षसचक्रवर्तिनो मयि मोहः किमु ? मेऽपराद्धता ॥९१॥

लक्ष्मणान्तमविण अवसाम इति बहुत्वम्। वनवासोऽपराधश्चेल्लक्ष्मणस्यापि स प्रसज्यत इति। तद् वनवासः। किमु इत्यत्र विपरीतकाक्वाऽनपराधो बोधितः। रावणप्रेमाऽपदत्वं त्वय्येवेति चेदाह—हतेति। चक्रवर्त्तिपदमैश्वर्यप्रयोज्यत्वं मोहस्य व्यनक्ति। मोहः सीता मय्यनुरक्ता स्यादिति भ्रान्त्यात्मनो रागः। अत्रापि काक्वाभिप्रायः पूर्वक एव। वनवासोऽन्यकाम्यात्वज्ञेत्यमयं मय्यपराधश्चेत्तुल्यं लक्ष्मणेऽपि वनवासित्वाच्छूर्पणखाकामनात्वाच्च। तयात्वेऽपि तस्यानपराधित्वे रामेणानुमोदिते ऽविमृश्यकारित्वं रामस्येति भावः। अत्र प्रकरणे केषुचिद्वर्णकप्रतिपादनात्मकं रूपमङ्गम् ॥ ९१ ॥

राज्ञा हि प्रजानां रञ्जकेन भाव्यम्। तास्त्वरयैव दोषदर्शिन्यो, न राम इति चोद्दिममङ्गीकृत्य दूषयति—

ध्रुवमेव नृपोऽनुवर्त्ततां चरितव्येषु निजप्रजामतम्।
बहुभिर्बहुधेप्सितं जनैः किमु ? संशोध्य न बुध्येते नृपैः ॥९२॥

अनुवर्त्तताम्मिन्नानुमतौ लोट्, प्रजानुवृत्तिर्धर्मापण्यनुमतेति। ध्रुवं निश्चितम्। तर्हि रामे कोऽपराधः? तत्राह—बहुभिरिति। ईप्सिते प्रकारबहुत्वोप—

पादकमिदम्। जनैः जनिमात्रधर्मभिः। तेषां पामरप्रायतया तदीप्सितं नादरणीयम्, तत्त्वेऽपि नृपैः प्रजाहितमीप्सुभिस्तथ्यातथ्यविचारः कार्यः, तदकरणं रामस्यापराधः। नृपैरिति सामान्यत उक्तौ रामस्य निरपराधत्व प्रकाशनानौचित्यात्राभिप्रायकम् ॥ ९२ ॥

प्रजानां त्वच्चारित्रशङ्कायामैकरूप्यात्तद्विपरीताचारो दुरपकर्षो राज्ञो ममेति चेदाह—

रसनाऽतिघना खलस्य, सा निजदृग्भ्यामपि युध्यते भृशम् ।
वितथो जनवाद इत्यहं शुचिवृत्तिर्मम साक्ष्यमादधे ॥९३॥

खलस्येति जातावेकत्वम्। रसना आकारतो मृद्व्यपि कार्यतोऽतिघना क्रूरा। वक्तृगतं क्रूरत्वं तस्यामारोपितं दुस्सहतां व्यनक्ति। कुतो निश्चीयते? तत्राह—सेति। निजदृग्भ्यामिति। निजेत्यनुचितत्वं, द्विवचनेन प्राबल्यञ्च गमयति। युध्यते विजिगीषया प्रवर्त्तते। स्वचाक्षुषमपि खला अन्यथा वदन्तीति तद्वादो न श्रद्धेय इति भावः। कल्पितमप्यवर्णमङ्गीकुर्वाणा ब्रूते—वितथ इत्यादि। इतीत्यव्ययं सप्तम्यन्तार्थकम्। अत्र विषय इत्यर्थः। साक्ष्यमित्यनेन सम्बन्धः। मम मत्सम्बन्धि साक्ष्यं निर्णेतृत्वमादधे। सच्चरित्राहं लोकोक्तिर्मिथ्येति विषयेऽहमात्मानमेव साक्षिणमध्यवस्यामीत्यर्थः ॥ ९३ ॥

प्रजारञ्जकत्वमपि रामस्य न निपतमिति सोत्प्रासं ब्रूते—

श्रियमेव भुजान्तरागतामदयं दूरमपास्यदञ्जसा ।
जननी भरतस्य, किं तदाऽप्यबुधद् भूमिपतिः प्रजाहितम् ? ॥

भुजान्तरमुरः आगताम् अयत्नसिद्धाम्। अत्याज्यात्वं गम्यते। श्रियं सर्वकाम्याम् अञ्जसा विना विमर्शम्। अदयं लक्ष्मणादिभिः प्रतिषेधे कृतेऽपि अनर्हं यथा तथा अपास्यद् अत्याजयत्। अन्तर्भावितण्यर्थकोऽयम्।

प्रयोजककर्त्री भरतस्य जननी, रामः प्रयोज्यकर्ता। कैकेय्याः स्वपुत्रे पक्षपातोऽर्थशक्त्या गम्यते। तेन त्यागायोग्यता च। अपीति साम्ये, मत्त्यागकाल इवेत्यर्थः। प्रजानामासत्वेनाभिमतानां हितम्। यदि रामः प्रजाहितव्यसनी, तर्हि मत्त्याग इव श्रीत्यागेऽपि तथा भवितुमर्हतीति भावः। सोत्प्राशोक्त्या ईर्ष्याप्रकर्षो गम्यते। पूर्वार्धे समासोक्तिः ॥९४॥

तदानीं पितुः सत्यसन्धताम्, इदानीमात्मनो धर्मनिष्ठाञ्च निर्वोढुं राघवे विरुद्धवृत्तितेति चेदाह—

तदहो! दृढसत्यसन्धता परमेतद् ध्रुवधर्मनिष्ठता।
महतां किल चापलानि वा जनता स्तौति महागुणा इति ॥

तत् श्रियोऽपास्तनम्। ईर्ष्यातिशयादुद्देश्यविधेयमध्ये अहो इति। दृढा अन्यथाकर्तुमशक्या। परमिति वैपरीत्ये। उभयत्रापि विधेयभागे विपरीतकाकुः। तवैवैकस्या विपरीतमानमिति चेदाह—महतामिति। किलेत्यरुचौ, ईदृशेषु महत्त्वमेव विप्रतिपन्नमिति। चापलानि अस्थिरचित्तचेष्टितानि। जनता अविवेकिसमुदायः। महागुणाः कर्त्तव्यानि। इति स्तौति। अर्थान्तरन्यासः ॥९५॥

रामकृतमनुमोदमानाया जनतायाः अविवेकं विवृणोति—

अवृणोज्जनता मुदा महामहिषीत्येव पुराऽऽदरेण माम्।
पुनरेमि कथन्नु? निन्द्यतां मनुवंशाङ्कुरगर्भधारणात् ॥९६॥

अवृणोदङ्गीचकार। हृदयपूर्वकताभिप्रायकं मुदाऽऽदरेणेति च। एवकारो लेशतोऽप्यच्छद्मनस्कत्वं तदानीन्तनं प्रजानां गमयति। निन्द्यताहेतुमधुनातनमाक्षि पति—कथन्निवति। अनियतचित्ता जनता न गण्या इति भावः ॥९६॥

रामजनतयोर्निर्दोषतां मनसिकृत्य स्वविपत्तौ हेत्वन्तरं सम्भावयति—

प्रियता नयतो ययेर्ष्यया चिरवन्ध्येति मयि प्रदर्शिता।
अपवादशरेण सा पुनः प्रहरेदित्यपि सम्भवेन्न किम् ॥९७॥

नयतः कपटमुपायमालम्ब्य। ययेर्ष्यया मयि प्रियता प्रदर्शितेति योजना। चिरं भर्तृसाहचर्येऽपि गर्भाधारणाद् वन्ध्येति निश्चित्य मामीर्ष्या सेहे। इदानीमवन्ध्यात्वे निश्चिते राजमातृत्वादिकमुत्कर्षं मयि भविष्यन्तं निश्चित्यापवादं शरं विधाय मां सा प्रहरेदिति किंन सम्भाव्यमित्यर्थः। जनतानिष्ठं प्रियतादर्शनमीर्ष्यायामारोपितम्। तस्यां सपत्नीव्यवहारप्रतीतेः समासोक्तिः। ईर्ष्यैव परिवादस्य हेतुरिति भावः। तस्याऽतथ्यत्वादिकं व्यङ्ग्यम् ॥ ९७ ॥

रामं प्रतीर्ष्याकषायितचेतास्तमेवापराधिनं निश्चिनुते—

भरते वनमागतेऽपि यत् परशङ्कामलिनं मनोऽभवत्।
नरकल्मषसंशयं विना धवलं जतमहो ! तदेव किम् ? ॥९८॥

आत्मानं साकेतं नेतुमागते भरतेऽपि परः शत्रुरिति शङ्कया रामस्य मनः कलुषमभूदित्यर्थः। धवलं निर्दुष्टम्। अहो इत्यसहने। किमित्यत्र विपरीतकाकुः। यद्यपि श्रीवाल्मीकिना धीरोद्धते लक्ष्मण एव भरतशत्रुत्वशङ्का वर्णिता, तथापि कविना तुल्ययुक्त्या रामेऽपि सा सङ्घटितेति केचित्। तत्तु पूर्वप्रसिद्धिविरोधाद्रसिकानां हृदयसंवादं निरुन्धत् काव्यस्य दुष्टिं विदधीतेति परे। ये तु समग्रादामायणाद्रामं धीरोदात्तमग्रहीषुस्तेषां दोषतया भानेऽपीतरेषां तथा भानं न नियतमित्यन्ये ॥ ९८ ॥

रामस्य विश्वसितघातुकतां विचिन्तयन्ती ब्रूते—

दयिते परदैवते मनो दधुषी किन्नु न भक्तिमत्यहम् ? ।
अहितं मम मां नृपोऽवदद्यदि का हानिरिदन्तु किं कृतम् ? ॥

दयिते दैवतत्वरूपजं चित्तज्ञत्वाध्यवसायात्। मनो दधुषीत्येकाग्रतोक्ता भक्तिव्यञ्जिका। मम सर्वथा दयितानुवृत्तिपरायाः अहितं त्यागरूपम्। नृपः स्वतन्त्रवृत्तिः। का हानिः? न कापि। त्याग एव न युक्तः, तत्राऽप्यकथयित्वा सुतरामित्यमर्षातिशयो व्यज्यते ॥ ९९ ॥

इत्थं परां काष्ठामारूढायां चिन्तायां देव्याः सात्त्विकभावावस्थां सहृदयेषून्मीलयति कविः—

अथ वाममुरोऽस्फुरत् सतीनयने चाश्रुकणानर्षताम् ।
पुटभेदकमारुतेरिते सहिमे गुल्मदले इवान्तरा ॥१००॥

अवर्षतामित्यश्रुकणानामविच्छिन्नत्वम्, उपमया शोकचिन्तादेरनिषेध्यता-सहनीयते च व्यज्यन्ते ॥ १०० ॥

अत एवाह—

तरसाऽनुबबन्ध चिन्तनं तरलापाङ्ग्यविभङ्गधारया ।
किमपां स रयो निरुध्यते मरुदारब्धतरङ्गसेतुना ? ॥१०१॥

तरलापाङ्गीत्युक्तभावानुभावोक्तिः । अविभङ्गधारयेति वैशिष्ट्यरूपोपलक्षणे तृतीया । अनुबन्धनक्रियाविशेषणमेतत् । तस्य सम्भवं व्यतिरेकेण प्रति-वस्तूपमया द्रढयति—किमपामिति । तरङ्गसेतुनेति रूपकेण निरोधा-शक्तिरुक्ता ॥ १०१ ॥

त्यागस्यानिवेदने हेतुं सम्भाव्य निषेधति द्वाभ्याम्—

गिरिगह्वरमुग्रकाननं हरिशार्दूलभुजङ्गसंहतिः ।
पिशिताशनवृन्दवासभूर्जलधिस्तुङ्गतरङ्गसङ्कुलः ॥१०२॥

इति तानि मनुष्यभीषणान्यखिलान्यन्तिक एव याऽविदम् ।
यदि साऽहमवैष्यमेव तत् किमभेष्यं ? किमिदं कृतं रहः ? ॥

भयातून मुत्तरोत्तरमुत्कृष्टत्वेन क्रमेण निर्देशः । तत् त्यागरूपम् । लङ्घनेन पूर्वं ज्ञातेऽपि त्यागे न मे भयं जायेतेति गम्यते । किं तस्माद्धेतोः । इदं त्यागात्मकम् । तदिदमभयां सर्वनाभयां द्वाभ्यां त्यागाधिक्यं वैलक्ष्यातिशयात् ॥ १०२, १०३ ॥

यदि त्वां पूर्वमबोधयिष्यम्, तर्हि प्रतिबन्धं व्यधास्य इतिचेन्नेत्याह—

पतिचित्तविरुद्धवृत्तितां किमु यायान्मनसापि जानकी ? ।
प्रवहेत् किमहो ! महोदधेः प्रतिकूला स्वरयेण जाह्नवी? ।।

मनसापि, किम्पुनर्वाचा कर्मणा वा ?। अप्रतीकारपारुष्याणां तरुणीनां विरुद्धवृत्तिता स्यादेवेति चेदाह—जानकीति। विवृतभावमिदमादौ। अहो इति विस्मये। सकाकुना दृष्टान्तेनानुकूल्यं स्वस्मिन् प्रत्याय्यते ॥ १०४ ॥

अपकीर्तिंपरिजिहीर्षया त्यागोऽयमनुष्ठेयः संवृत्त इति चेदाह—

अपकीर्त्तिभयान्ध इदृशः स्वपरिक्षालनतत्परो नृपः ।
कृपणोचितकर्मणाऽकरोदपवादं सुदृढं पुनर्न किम् ? ।।१०५।।

अन्धो ध्वस्तविवेकः। ईदृशो दुष्करकारी। स्वस्य परिक्षालने दुर्यशः-पङ्कप्रमार्जनफलके। नृपो यशोधनाभिमानी। कृपणस्याऽविवेकिन उचित-मभ्यस्तं योग्यञ्च यत्कर्म तेन। यन्निवारणाय या प्रवृत्तिः सैव तद्विरुद्ध-फला जातेति विषमभेदः। पुनः सविशेषम् ॥ १०५ ॥

न केवलं भर्तुरैहिकोऽवर्णः, पारत्रिकोऽपि दुर्वारोऽजनीत्याह—

न च दण्डयतेऽपराधिनं कृपयाऽऽगोविशयेन धार्मिकः ।
अपराधमृतेऽस्मि दण्डिता तदपास्येत् कलुषं कथन्नृपः ?।।

धर्मं चरतीति धार्मिकः धर्मकाङ्क्षीति यावत्। आगोविशयेन अयमागस्वी अपराधी न वेति संशयेन। अनपराधिनो दण्डनेन पीडा मा भूदिति कृपया न च नैव दण्डयते। आर्यपुत्रस्तु मयि प्रतीपमाचरदिति तज्जन्यं कलुषं कथं केन प्रायश्चित्तेन अपास्येदुच्छिन्द्यात्। "शकि लिङ् चे"ति लिङ्। नैव शक्त इत्यर्थः ॥ १०६ ॥

वनगमनमर्थयमानायै ते तन्निर्वाहको रामः कथमपराध्येद् ? इति चेदाह—

मम दोहदमेव गर्भिणी प्रणयप्रत्ययतस्तदाऽवदम् ।

यदवञ्चयदध्वनाऽमुना नृपतिर्मा,मविषह्यमेव तत् ॥१०७॥

दोहदो गर्भिण्यभिलाषः । प्रणयप्रत्ययतः प्रणयोचितं विदध्यादिति विश्वासतः । अध्वना उपायेन । फलस्य सुसाधत्वं व्यङ्ग्यम् । अवञ्चयत्त्यागरूपं वर्जनमकरोदित्यर्थः । प्रतारणार्थकत्वे तु "गृधिवञ्चयोः" इत्यात्मनेपदापत्तेः । नृपतिरिति महतां विश्वसितघातित्वं नोचितमिति । अत एवाविषह्यमिति ॥

तस्यानुचितं कृत्युमुद्घाटयति—

अगमं गहने सहाऽमुना पितुराज्ञामनुसृत्य गच्छता ।

अनयोऽशरणां प्रियोऽनयत् स निजाज्ञामिषतां वने तु माम् ॥

पितुरलङ्घ्याज्ञस्य । गहन इति चिरवासप्रतीतये कर्मणोऽधिकरणत्वविवक्षया सप्तमी । उचिताचारा सती नाहमपराध्यामि, आर्यपुत्रस्तु न तथा, यतः अनयः नीतिशून्यः । प्रियः प्रियशब्दमात्रभाक् । स कृतघ्नो निर्दयश्च । भक्ष्यार्थक अमिषशब्दोऽधीनतां लक्षयन् रामे त्यागयेष्टतां व्यनक्ति ॥ १०८ ॥

कृतघ्नतां सेर्ष्यमुद्घाटयति—

इतरेतरभेदमन्तरा हृदि जातः प्रणयः, स तिष्ठतु ।

अपि तां प्रथितां कृतज्ञतां स हतायां नृपतिर्ममाऽऽहृत॥१०९॥

इतरेतरभेदमन्तरा देहादिप्रयुक्ते सत्यपि भेदे तद्ज्ञानविरोधी । हृदि जातो रूढः । सः "हृदयन्त्वेव जानाति प्रीतियोगं परस्परमि"ति संस्तुतः प्रणयः । तिष्ठतु मा भूरित्याज्यतया गणनीयः । तां स्वयमनुभूताम् । हतायां अवमतायाः । आहृत नाशितवान् । "आङो यमहनः" इत्यात्मनेपदम् । मदीयायां आर्यपुत्रविषयिण्याः कृतज्ञतायां विस्मरणादिति भावः ॥ १०९ ॥

आर्यपुत्रो न मय्येव स्वस्मै चापराद्धवानिति प्राणिसामान्यविरुद्धवृत्तिः संवृत्त इत्याह—

कृपयैव विषह्य वा रुजां स पिपीलोऽप्यवति प्रजां निजाम् ।
दयितः सुजनाग्रणीः स मे निजगर्भं विपिनेऽप्युदक्षिपत् ।।११०।।

कृपया नरवन्न प्रत्युपकारार्थितया । पिपीलः पिपीलिका क्षुद्रजन्तुरपि, किम्पुनर्विवेकी नरः । निजां निरुपाधिकवात्सल्यास्पदम् । दयितो निष्प्रेमा, सुजनाग्रणीः दुर्जनाग्रगण्य इति विपरीतलक्षणा । निर्दयत्वदुर्जनत्वातिशयो व्यङ्ग्यः । निजगर्भम् अपि न मामेव । रामे स्वस्येर्ष्यातिशयः प्रकटितः ॥११०॥

जनकानुवर्तित्वेन प्रथितोऽपि वस्तुतस्तद्विपरीतकारीत्युद्घाटयति—

श्वशुरोऽशुभहारिभिर्महाक्रतुभिर्यं लभते स्म नन्दनम् ।
स निशम्य तु पैशुनं वचः शिशुलाभोत्सवपुण्यमत्यजत् ।।१११।।

महाक्रतुभिः विविधैः कृच्छ्रसाध्यैश्च । नन्दनम् आनन्दग्रन्थित्वेनोपश्लोक्यमानम् । स नन्दनस्तु । पैशुनमश्रद्धेयम् । शिशुलाभोत्सवस्य तद्धेतुं पुण्यम् अत्यजद् निष्फलं व्यधात् । पिता पुत्रं चकमे, पुत्रस्तु रामः स्वपुत्रत्यागं कृतवानिति विरुद्धकारित्वम् । अत्र प्रकरणेऽधिबलमङ्गं पुनरनुसंहितम् ॥ १११ ॥

स्वस्मिन्निवान्यत्रापि निर्दयत्वं रामशीलमन्यथाभवितुं न प्रभवेदित्याशयेनाह—

अपि नैष जनाधिपोऽवधीददयः कञ्चन शूद्रयोगिनम् ।
अथवाऽमुममूमुहन्नृपं वनितापादजगर्हिणी श्रुतिः ।।११२।।

जनाधिपोऽपक्षपातार्हः । शूद्रयोगिनं परपीडां विना स्वभूतये प्रवर्त्तमानं शम्बूकनामानम् । कञ्चन अज्ञातपूर्वत्वेन द्वेषानर्हम् । शूद्रेति रामस्य द्विजपक्ष्यत्वाभिप्रायेणोक्तिः । इत्थं विस्तृते गर्भसन्धौ तापसीभक्त्यादिना शमे प्रौढिं गतेऽपि पौररामविषयकेर्ष्यादौ शमविरुद्धे प्रवृद्धे तद्बाधकतया स्थिते चेर्ष्यादिबाधकमत्यादीनामुत्तरोत्तरं प्रकर्षं शमस्थायिफलकं स्थूणानिखननन्यायेनाधातुमना विस्तरेणैवावमर्शात्मिकां चिन्तां विधातुमारभते —

अथवेत्यादि। एतेन अधमनारीवद्देव्या मैथिल्याः खिलीकारः कृतः कविनेति ये निरूपकम्मन्याः प्रलपन्ति, ते तु कविप्रतिभाया देवानाम्प्रिया निरस्ता वेदितव्याः। वनितायाः पादजस्य शूद्रस्य च गर्हिणी अपकर्षबोधिका श्रुतिरमूमुहत्। नचेदमसम्भाव्यम्। अपथे पदमर्पयन्ति हि श्रुतवन्तोऽपि रजोनिमीलिताः। अत्र कुलटाया ऐश्वर्यवन्तं कञ्चन पिशुनोक्त्याऽकृत्ये प्रवर्त्तयन्त्याः समाधिः। इतः प्रभृति द्वाषष्ट्यधिकशततमं पद्यं यावद् निर्वेदमत्योर्विरोधिन्या विषयचिन्तया तरलतामापन्नस्य मनसः शमाय हेत्ववमर्शपुरस्सरं तत्स्थिरत्वसम्पादनप्रयोजना चिन्ता नियताप्तिप्रकरीसम्बन्धरूपा अवमर्शसन्धिः। प्रकरी च विश्वास्यताप्रकाशकरटवृत्तान्तादिचिन्ता बोध्या ॥ ११२ ॥

रामस्य शीलवैरुद्ध्ये हेतुं सम्भाव्याऽल्पागस्कतां व्यनक्ति—

अपि धार्मिकतार्द्रतादिकां महनीयात्मगुणावलीमहो !।
सहसा निरवासयन्नृपस्तदनु स्वां सहधर्मिणीमपि ॥११३॥

अपिः सम्भावनायाम्। धार्मिकताऽर्द्रता प्रति हेतुरित्यभ्यर्हितत्वाद् धार्मिकतेत्यस्य द्वन्द्वे पूर्वनिपातः। आत्मेति साहजिकत्वाभिप्रायेण। तादृशगुणनिर्वासनस्य दुष्करत्वादहो इति विस्मये। तदनु गुणावलीनिर्वासनानन्तरम्। सहधर्मिणीमत्याज्याम्। कलुषशेमुषीकान् नलादीन् निदर्शनतया हृदि निधाय नृप इति सामान्येनोक्तिः ॥ ११३ ॥

स्वत्यागस्य गुणावलीत्यागहेतुकतां व्यतिरेकसहचारेण विशदयति—

उटजे विपिने ममैव सा हरिणी दुर्वहगर्भमन्थरा।
अयते पदवीं दृशोर्यदा, द्रवतो मे दयितस्य लोचने ॥११४॥

ममैव मत्पोषितत्वमात्रवती। हरिणीति जात्यन्तरत्वेन स्नेहप्रकर्षस्याऽप्रसक्तिर्गमिता। तादृश्यामपि यो दयावानभवत् स गुणावलीत्यागाभावे

निर्दयः कथं मां त्यजेदिति दयातिशयं बोधयितुमश्रुगता द्रुतिर्लोचनयो-रारोपिता। वृत्तोऽप्ययं वृत्तान्तो भावनावैभवाद्वर्तमानत्वेन भानादयते द्रवत इति लटौ। अतो भाविकमलङ्कारः ॥ ११४ ॥

सदयनिर्दयत्वयोरेकस्मिन् सहकारिवैचित्र्यात् सम्भवं समर्थयते —

समुदेति मनोगतिर्वने मृदुला सेव नवा दलावली।
क्षितिभृन्मुकुटोत्कटापि सा भजते वज्रकठोरतां पुरे ॥११५॥

मनोगतौ मृदुलत्वकठोरत्वे तु सदयत्वनिर्दयत्वे। उत्कटत्वं सगर्वत्वम्। उपमासहिताऽप्रस्तुतप्रशंसा समर्थिका। अत्राऽनन्तरे च दोषप्रख्यापनात्माऽपवादोऽङ्गम् ॥ ११५ ॥

उक्तं विशेषे निगमयति —

दयितोऽयमनन्यसन्निभं वनवासे मयि हार्दमावहत्।
विभुताऽभ्युदिता यदा स्वयं क्षयमेयात् परमार्थसौहृदम् ॥

अनन्यसन्निभमित्यनन्वयोऽसमो वाऽलङ्कारः। हार्दातिशयो गम्यः। परमार्थसौहृदमनुपाधिकं प्रेम। स्वयमिति विभुताभ्युदयादन्यस्य हेतुतानिरासः। अत्र मतेः पुनरुद्गमः, ईर्ष्यायाः प्रशाम्यदवस्था च ॥ ११६ ॥

पूर्वसौहृदस्य स्मरन्त्याह कतिभिश्चित्—

नियमानतिवाह्य चान्वहं प्रियगोदातटिनीतटेष्वहम्।
दयितेन सहाऽवसं प्रिया प्रियशिष्येति च यत् स्मराम्यहम् ॥

अतिवाह्येति। तावत्यपि कालेऽसहवासस्य दुःसहत्वम्, अन्वहमित्यतृप्तत्वम्, प्रियेति प्रीणने प्रियशिष्येत्यनुवर्त्तने च चातुर्यं व्यज्यते ॥ ११७ ॥

गतगर्वमनन्यदम्पतिप्रतिपन्नेषु विविक्तकेलिषु।
भवि नूतनचेतनो वपुर्युगसंयुक्त इवारमावहि ॥११८॥

अनन्येति गर्वस्य प्रसक्तिरुक्ता। तदनुत्पत्तिस्तु प्रेमदार्ढ्यात्तद्विरुद्ध-भावनिरोधात्। अत एवोत्प्रेक्षया प्रेम्णः परा काष्ठा प्रकटिता। अरमावहीति च्छेदः ॥११८॥

तादृशं प्रेमाणं कार्यमुखेन स्तौति—

नलिनानि विलूय सन्तरन् विनिमज्जन् हिमशीतले ह्रदे।
पुलिनेषु मया सह द्रवन् शिशुवत् खेलति मत्प्रियस्तदा॥११९॥

शिशुवदित्युपमया कर्त्तव्यान्तरविस्मरणादि, खेलतीति लटा अतीतस्यापि वर्त्तमानतया भानञ्च गम्यते ॥११९॥

पशवस्तु विवेकिनो यथा गतपक्षाः पतगा नवा यथा।
परमन्वभवाव कानने सुखमावां किमिदं स्मराम्यहम् ॥१२०॥

पशवस्त्वित्याद्यसम्भावितोपमाद्वयं पूर्वोत्तरावस्थाविस्मरणकालिकत्वं सुखानुभवे व्यनक्ति। गतपक्षाः पक्षशून्याः। नवा इत्युपमानद्वयेऽपि योज्यम्। उपमानविशेषणाभ्यामेकगुणहानौ गुणान्तरैः साम्यं द्रढयति। किंशब्दः क्षेपे। नेदं स्मरणार्हमधिकदुःखदत्वादित्यर्थः ॥१२०॥

तादृशं प्रेमाणं देवकल्पं स्तुवन्त्याह कतिभिश्चित्—

सहजामलराग! मानसे कुहरे त्वं स्फुरसि स्फुटो मणिः।
महनीय! भवन्तमावहत्युरसाऽऽत्मा रुचिरं विभूषणम् ॥

सहजत्वं वासनारूपेणानादित्वात्। अमलत्वं विरुद्धमनोवृत्त्यरूपितत्वात्। मानसे कुहर इति रूपकं रागस्येतरापरिच्छेद्यत्वं गमयति। त्वं मणिरनाश्य-प्रकाशत्वात्। महनीय पूजनीय। आत्मा जीवः। उरसा मुख्येनावयवेन। रुचिरं विभूषणं सदातनशोभाधायकत्वात् ॥१२१॥

पुरुषेषु पुमर्थकारणं त्वमसि स्त्रीषु शुभाः स्त्रियो गुणाः।
मरुभूमिमहो! मनोहरां कुरुषे त्वं नवपुष्पवाटिकाम् ॥१२२॥

अन्यनसूयादिरागा यथायथमत्र निदर्शनीकर्त्तव्याः। ललितं निदर्शनाबालालङ्कारः ॥ १२२ ॥

अनुग्रहे निग्रहे च सामर्थ्यं देवसाम्यं हृदि निधायाह—

नयमार्गचरान् प्रदीपवद्विमानेतुमुदेति ते प्रभा ।
असतो नियतञ्च नारकं विपरीताचरितं तवानयेत् ॥१२३॥

रागे प्रभा कृत्येषु प्रवर्त्तना । दिवे दुःखासङ्कीर्णं सुखम् । नारकं सुखासङ्कीर्णं दुःखम् ॥ १२३ ॥

अयि राग ! विराज शाश्वतं, मरणेनापि कृता न ते क्षतिः ।
नयनोदनिवापमापिबन् स्मरणेनार्पितमेष जीवसि ॥१२४॥

शाश्वतं विराज मनोवृत्त्यन्तरेणानिरुद्धं शोभस्व । सम्भावितं नाशं निषेधति —मरणेनापीति । यथोक्तं "स्मरति नूनमबोधपूर्वं भावस्थिराणि जननान्तरसौहृदानि" इति । कुतो न क्षतिः ? तत्राह—नयनोदनिवापमिति । "उदशोर्षं गमिष्यति" इतिवदयं प्रयोगः । स्मरणेन त्वदात्मजस्थानीयेन । एतेषु स्वकीयरागगुणाविष्करणरूपं विचलनम्, देवत्वेनाध्यवसितस्य रागस्य स्तुत्या गुरुकीर्तनात्मा प्रसङ्गश्चाङ्गे ॥ १२४ ॥

कथमहं विराजेयम्? मद्द्वेषिणि द्वेषं जाग्रतीति मा शङ्किष्टाः, यतस्तवारिं द्वेषः, किन्तु गर्वः। स तु परिहर्त्तव्य इत्युपदिशति—

न हि ते प्रतिरोधको भवेत् स विरोधः प्रियते ! गतच्छलः ।
रतिवर्त्म निरुद्ध्य हन्ति यो हृदये त्वामिह गर्व एव सः ॥

गर्वः स्वस्मिन्नुत्कृष्टत्वबोधको मोहः । परिहार्यं सूनास्थानमुपदिशति—हृदय इति। रतिवर्त्म प्रेम्णस्तवेष्टसाधनत्वज्ञानात्मकमुपायम्। निरुध्य अनुत्पाद्य। रामे मां प्रति वर्त्तमानन्त्वां राजत्वाद्यधीनो गर्वः ध्वंसितुमध्यवस्यतीत्याकूतम्। इतः प्रभृत्यष्टाभी रामस्य तत्प्रेम्णश्च तिरस्कारप्रतीतेर्गुरुतिरस्कृतिरूपो द्रवोऽङ्गम् ॥ १२५ ॥

गर्वेण प्रेमनाशे साध्ये सहकारिवर्गमाह—

समदृष्टिरबाधचिन्तना क्षमिताऽन्योन्यगुणानुरागिता ।
इति ता दशति श्रमं विना क्रमशश्चान्तरगर्वमूषिकः ॥१२६॥

आन्तरः बहिरप्रकटः, दशनीयान्तः प्रविष्टश्च । गर्व एवापरिहार्यदोषकरत्वान्मूषिकः । दम्पत्योः सुखदुःखयोः समा दृष्टिर्बुद्धिः । अबाधचिन्तना इतरेतरपीडाऽजनकत्वचिन्ता । क्षमिता सत्यप्यपराधे प्रतिचिकीर्षाशून्यता । अनुरागिता अनुमोदनम् । श्रमं विना इतरावेद्यतया । क्रमशः ग्रीष्मे जलह्रासवत् । गर्वो ह्युक्तान् गुणान् उक्तेन प्रकारेण नाशयित्वा दम्पत्योः प्रेम्णो ह्रासं सम्पाद्य तं समूलघातं हन्तीति भावः ॥ १२६ ॥

गर्वोत्पत्तेः कारणान्याह—

विभवः श्रुतिरुत्तरोत्तरो विजयः कर्मसु वैभवं परम् ।
प्रभुतेति च तैर्नवोदितैर्दुरहन्ता प्रभवेत् समेष्वपि ॥१२७॥

"आनुपूर्व्यं द्वे वाच्ये" इति द्विरुक्तमुत्तरोत्तर इति यथायथं लिङ्गविपरिणामेन विभवादिषु सर्वत्र सम्बध्यते। तथा परमित्यपि। विभवः सम्पत्समृद्धिः श्रुतिः ख्यातिः। विजयः शत्रुनाशादौन्नत्यलाभः। कर्मसु वैभवं फलोपधायाकत्वम् । प्रभुता स्वातन्त्र्यम् । नवोदितैः नूतनतया भासमानैः। दुरहन्ता गर्वः। समेषु सर्वेषु साधुषु च। अपि प्रभवेत् प्रेमनाशनायाऽलं भवेत्। क्रमशो वर्द्धमाना विभवादयः परां कोटिं प्रतिपन्नाः सन्तः प्रत्येकमपि प्रेमाणं हिंस्युः। रामे तु समुदिता ह्येत इति प्रम्णः का कथेति भावः एतेषां खलेकपोतन्यायेन फलजनकत्वात् समुच्चयोऽलङ्कारः ॥ १२७ ॥

तादृश्या दुरहन्तायाः विलासः स्वत्याग इति मनसिकृत्याचष्टे—

अभिमानमरुद्धता यदा बत ! निर्वात्यनुरागदीपिका ।
अनुयन्निनदं स्तुतेस्तदा निपतेत् साहसकूपके मनः ॥१२८॥

अभिमान एवेतरानपेक्षकार्यकारित्वान्मरुत्तेन हता। बतेति रामविषयके खेदे। सुजीवितसरणिसञ्चारोपयोगितयाऽनुराग एव दीपिका। कप्रत्ययेन कोमलत्वं गम्यते। स्तुतेः तद्धीनं निनदम्। यद्वा स्तुतिरेव निनदः। राहोः शिर इतिवत् षष्ठी। आवर्षकत्वं गम्यम्। साहस एव कुत्सिते कूपे। अनिष्टनिवारणोपायालाभेन नाशहेतुत्वात्। मन एव पान्थ इति एकदेशविवर्तिरूपकम्। इदं प्रस्तुते रामव्यापारे पर्यवस्यति ॥ १२८ ॥

तस्य गर्वजन्यत्वं निगमयितुमितरजन्यत्वनिरासकं तर्कं प्रकटयति—

इयमस्ति तथा स्थितिर्न चेदपकीर्त्तावविरक्त एव सः।
भुवमद्य भुनक्ति किं नृपो विपिनेऽपास्य सतीं हि गर्भिणीम् ॥

इयं स्थितिस्त्यागात्मिका तथा गर्वहेतुका न चेदस्ति। भुनक्ति किमिति निषेधकाकुः। भुवमिति पालनीयवैपुल्यस्य प्रतीतेरपकीर्त्तेरपि तथात्वं गम्यम्। अद्य, एतावन्तं कालमविरागेण भोगे भाविन्यपि तथात्वं सम्भाव्यमित्याकूतम्। अवनार्थत्वाद् भुजेरात्मनेपदाभावः। साध्वीत्यागपूर्वकुलटाभोगः प्रतीयत इति समासोक्तिः ॥ १२९ ॥

त्वत्त्यागेन क्लिश्नन्नेव भुवं बिभर्ति राम इति चेदाह—

सहजा निहतारयो भुवो भरणे नो निपुणा नृपस्य किम्?।
गहने सहधर्मचारिणीसविधे वस्तुमिहास्ति नो स्थली?॥१३०॥

सहजा इत्यप्रजानुवर्त्तित्वस्य, निहतारय इति नैपुण्यस्य च गमकम्। किमित्यत्र निषेधकाकुः। स्थली अकृत्रिमापि भूः। गहन इत्यैहिकावर्णपरिहारः पारत्रिकश्रेयोलाभश्च स्यादिति व्यज्यते ॥ १३० ॥

शीलितराजसुखः कथं गहने वसेदित्याह—

परिशील्य न वेत्ति किं नृपः परिशुद्धं तमिमं वनाश्रमम्?।
किमनेन चिरं न शीलता विमलाध्यात्मविचाररीतयः? ॥

परिशुद्धं नगरवन्नाशुचिम्। वनाश्रमं वानप्रस्थोचितम्। न वेत्ति किम्? वेत्त्येव। वनवासोचितमातिवैरागादिविरहोऽपि नात्र बाधक इत्याह— किमिति। अनेन विज्ञानयोगवासिष्ठादिना। विमलः अन्तःकरणशुद्ध्यादिद्वारा मोक्षपर्यवसायी। अध्यात्मविचारः आत्मानात्मचिन्ता। इत्थं कृते गलितवयसामिक्ष्वाकूणां कुलव्रतमपि पालितं भवेदिति ॥ १३१ ॥

तस्माद्रामस्यावस्थान्तरप्राप्तिरेव त्यागहेतुरिति निश्चिनोति —

दयितां प्रति वाच्यमुच्यते यदि नीचोऽपि न तत् सहिष्यते।
अशृणेत् स कलङ्कमुत्तमः श्रुतिवन्मां प्रति भाषितं कथम्? ॥

वाच्यमपवादः। उक्तिकर्त्रनुक्तिर्वक्तृविशेषमनादृत्य। श्रुतिवदित्युपमा भाषितस्याविचारेण प्रमाणतया ग्रहणं सूचयति। अत्र विस्मयस्योद्गमावस्था ॥

विस्मये हेत्वन्तरं विवृणोति—

अकुपत् करटाय यो निशाचरवंशाटविमातनोन्मरुम्।
प्रणयेन पुरा, मयीदृशं स तु वीराग्रसरश्चरेत् कथम्? ॥१३३॥

अकुपदिति लुङ् पुषादित्वात्। करटायेति चतुर्थी "क्रुधद्रुह" इत्यादिना सम्प्रदानत्वात्। निशाचराणां वंश एव वंशो वेणुस्तस्याटविम् अटविशब्द इकारान्तोऽपि। राक्षसवंशे वैपुल्यं गम्यम्। मरुकरणेन निरशोषनष्टप्रायत्वञ्च। मयीति पूर्वोत्तरान्वयि। न चार्यपुत्रोऽविमृश्यकारी, यतो वीराग्रसरः। अग्रेसरस्थाने अग्रसर इति बाहुलकादिति पदमञ्जरी ॥ १३३ ॥

वाच्यापाकरण उपायान्तरालाभात् स्वत्यागः कृत इति मतिमालम्ब्याह—

अथवा नयवर्त्मना नृपो विविधाश्चारकथा विबुध्यते।
प्रथमानयशोधनो व्रजेदपकीर्त्यांऽप्यनया व्ययां पराम्॥ १३४॥

अथवेति शङ्कितपूर्वाया अविमृश्यकारितायां अतथ्यत्वं बोधयति। पूर्वार्धेन चारेक्षणविश्वसनीयत्वं नृपस्य व्यज्यते। प्रथमानं विततं यश एव धनं

परमप्रीत्यास्पदं यस्य सः। यशोनाशः परां व्यथां जनयेदेवेति भावः। एतदादिषु मतेर्दृढतापत्ययाद् भाविश्रेयोनिर्णयरूपं प्ररोचनमङ्गम् ॥ १३४ ॥

धर्मशूराणां व्यथाधिक्ये सम्भाव्यमेवेदृशमिति मन्वाना रामस्य निर्दोषतामाविष्करोति—

हृदये ज्वलिताद् द्रुतोदिता शिखिनः सा खलु धर्मशूरता।
अमुमप्यपकर्म कारयेद् विपदं नो गणयन्ति मानिनः ॥१३५॥

हृदये गूढे स्थाने ज्वलिताच्छिखिन इति प्रकटदुःखातिशयो निगीयते। संविभागानर्हतयेदृशस्य दुःसहत्वमुक्तम्। धर्मशूरता स्वधर्मनिर्वहणोत्साहः। कर्तृत्वविवक्षा सातिशयशक्तिमत्तां व्यनक्ति गम्यामिमां रामीयामवस्थां सामान्येन समर्थयते—विपदमिति। विपदपेक्षया मान एव माननीय इति प्रेमन्यूनता रामस्य न त्यागहेतुरिति ॥ १३५ ॥

शूराणां स्वसन्तापचिन्तया परसन्तापकरत्वं न दृष्टचरमिति त्यागे हेत्वन्तरं सम्भावयति—

अथवा नृपधर्ममामनन् कथमाप्याचरदेवमेव सः।
विषसङ्क्रमशङ्कया बुधो विषहेताऽपि निजाङ्गकृन्तनम् ॥१३६॥

आमनन्निति शब्दशक्त्या नृपधर्मस्याम्नायप्रतिपादितस्येवाननुष्ठाने पापजनकत्वं व्यज्यते। दयितावस्थाचिन्तया कथमपीति। एवकार उपायान्तरव्यवच्छेदकः। अत्र दृष्टान्तः—विषेत्यादि। बुधो विवेकी। निजेति दुःसहत्वाभिप्रायकम् ॥ १३६ ॥

चिकीर्षितस्य त्यागस्य पूर्वमनिवेदने हेतुमाशूरयति—

बहिरप्रकटो मनस्विनः स विकारोऽन्तररुन्तुदः परम्।
प्रकटाद् गहनहृदोद्धतादपि भङ्गाद् भयदोऽम्भसां भ्रमः ॥१३७॥

बहिरप्रकटत्वे हेतुर्मनस्विन इति॥ स्थिरचित्तस्येत्यर्थः। स आकस्मिकः। परं नितराम्। तादृशस्य विकारस्य सम्भाव्यतायां

दृष्टान्तः—प्रकटादिति। भङ्गान्तरङ्गात्। "पञ्चमी विभक्त" इति पञ्चमी ॥ १३७ ॥

त्यागस्यावश्यकर्त्तव्यतां व्यवस्थापयति—

परकार्यपरः स्वकृत्यमित्यरमालोचितमाशृणोति सः।
न परं विरमेद्यदाश्रुतं तदकृत्वा रघुनन्दनो महान् ॥ १३८ ॥

स राजा। अत एव परेषामेव कार्यं परं निर्व्याहतयेच्छाविषयो यस्य सः। अरमञ्जसा आशृणोति ताटकानिग्रहात् प्रभृति सर्वत्र स्वयमनुभूतत्वात्। परमित्येवार्थे न विरमेदिति क्रियान्वयि। रघुकौत्सादिवृत्तं मनसि निधाय रघुनन्दन इति। अतो महान् पूजनीयः। ईर्ष्यादेः शान्तिः प्रेमोद्भिन्नभक्तेरुद्गमश्च। इतः प्रभृति प्ररोचनादत्तपोषो गुरुकीर्त्तनात्मा प्रसङ्गोऽङ्गम् ॥१३८॥

आश्रुतादविरामे दृष्टान्तावाह—

अधिदण्डकमाशृणोदसावसुराणामतिदुष्करां हतिम्।
सहसा पुनरृश्यमूकभूधरसीम्नि क्षणनं च बालिनः ॥१३९॥

असुराणां सुरविरोधिनां राक्षसानाम्। क्षणनमिति "क्षणु हिंसाया" मिति धातोः। सहसेति पूर्वेतिरान्वयि। वञ्चनेनाप्याश्रुतनिर्व्हे द्वितीयो दृष्टान्तः। अत एव पुनरिति विशेषः ॥ १३९ ॥

यावतां दृष्टान्तानां परिगणनं दुष्करमित्याह—

बहु तादृशमस्ति भानुमत्कुलशार्दूलकृतं हि साहसम्।
महतः सुषमावहो भवेदगुणः कोऽपि दरो गिरेरिव ॥ १४०॥

वंश्यानामेकरूपेण वृत्तिः ख्यातिदेत्याशयेन भानुमत्कुलेति। तेन पूजनीयतता व्यज्यते। शार्दूलेति साहसार्थघटनौचित्याय। हि प्रथितम्। नातः परिगणनमपेक्षितमिति। बालिवधादिष्वारोप्यमाणं वञ्चकत्वमपि

राघवे न दोषमावहेदित्याशयेन—महत इत्यादि। अगुणो दोषः। उपमया राघवेऽलङ्घ्यत्वं गम्यते॥ १४०।

अविमृश्यकारित्वमपि न रामोपक्रमम्, किन्तु परम्परायातमित्याह त्रिभिः—

गज इत्यनुमाय मार्गणैर्मुनिसूनुं जनको जघान यः।
अनुतापसमातुरोऽमृत प्रणयिन्यै च वरं प्रदाय सः॥१४१॥

अत्र श्रावणवधकैकेयीवरदाने दशरथस्यानुसंहिते। तेन रामेऽप्यनुतापातुरत्वावकाशः प्रकटितः। अमृतेति लुङ्॥ १४१॥

चिन्तायां मतिपर्यवसायितास्वभावादाह—

इति तान्यतिसाहसानि चेद् गणितान्युज्झितरोषया धिया।
सुसहानि सुतेऽपि तान्यतः क्रमते हेतुगुणोऽपि वस्तुनि॥१४२॥

उज्झितरोषया धियेति बुद्धेस्तत्त्वपक्षपातो दर्शितः, दोषजन्यो भ्रमस्तदधीनो रोष इति। सुसहानीत्याधृषीयत्वेन णिजभावे प्राप्तकाले लोट्। सहनमेव प्राप्तकालं युक्तश्चेति। युक्ततामेव समर्थयते—क्रमत इति। वृत्तितायनयोरात्मनेपदम्। अपीति क्रमणान्वयि। न स्वस्मिन् एव तिष्ठति, किन्तु स्वजन्येऽप्यप्रतिबन्धं सङ्क्रम्य स्फीतो भवतीत्यर्थः॥ १४२॥

रामस्यानिष्टं सम्भावयन्ती सचकितमाह—

समवेक्ष्य पितामहो महानजनामा दयितामृतिं पुरा।
सरुजोऽमृत, तत्कुलाङ्कुरे परिदृश्येत च तद्गुणक्रमः॥१४३॥

पितामह इति गुणसङ्क्रमोपपादकम्। महानिति प्रेमादिप्रशंसा। अङ्कुरशब्दशक्त्या वृक्षादेरिव गुणसङ्क्रम इत्युपमा ध्वन्यते॥ १४३॥

स्वस्मिन् रामस्य प्रेमातिशयं निर्धारयति कतिभिश्चित्—

विशयो नहि तत्र भूधवोऽप्यधुना मत्प्रणयैकदीक्षितः।
विरहाद्विधुरं परस्त्रियां रमते मे रमणस्य नो मनः॥१४४॥

विशयो नहीति निषेधेनोपक्रमो वक्ष्यमाणे विपरीतसम्भावनाया अत्यन्त-निरासप्रत्यायनार्थः। तत्र वक्ष्यमाणे। मूढवोऽपि स्वधर्मेनिष्ठोऽपि। अधुना निरवधिके स्वमूलके विग्रहे। दीक्षित इति शब्दशक्त्या यागादिदीक्षित-साम्यप्रत्यायनद्वारेतरस्यां प्रणयस्याधर्महेतुत्वं ध्वन्यते। विधुरं कृत्यनिर्णया-शक्तम्। परस्त्र्यरमणे हेतुः—मे प्रियस्येति। मनः, बहुत्र चञ्चलप्रेमत्वेन प्रथितमपि ॥ १४४ ॥

कथं प्रणयातिशयो निर्णीतः? तत्राह—

विरहावसरे प्रियः पुरा परमुन्मादमगात् स राघवः।
जयमेत्य निवृत्त्य निस्तुलं प्रणयं मय्यदिशद्दिने दिने ॥१४५॥

जयमेत्य निवृत्त्येति कृतकृत्यस्य कामेऽधिकार इति नीतिर्दर्शिता। निस्तु-लमनन्वयालङ्कारतां यातम्। दिने दिन इति क्रमप्रवृद्धत्वं प्रणयस्य दर्शितम् ॥ १४५ ॥

"यावतः कुरुते जन्तुः" इत्युक्तनीत्या रामे निस्तुलां व्यथां सम्भावयन्ती सानुक्रम्पमाह—

अधुना नृपतिः कियत्ततो व्यथतेऽयं नवविप्रयोगतः।
धृतिमेत्य सहेऽद्य यां स्थितिं सहते सानुशयः कथं स ताम् ॥

भावनादार्ढ्यात् प्रत्यक्षायमाणत्वेनायमिति। नृपतिः स्वतन्त्र इति विप्रयोगस्य स्वयंसम्पादितत्वमुक्तम्। नवत्वं पूर्वापेक्षया दुःसहत्वात्। यां स्थितिं तामिति स्वस्य रामस्य चाऽवस्थयोरभेदभ्रमरूपा प्रत्यभिज्ञा। दुस्सहत्वे हेतुः-सानुशय इति। इतः प्रभृति प्रसङ्ग एवाङ्गमनुवर्त्तते ॥ १४६ ॥

सानुशयत्वे ज्ञापकहेतुमाह—

यजनेऽस्य हिरण्मयं नवं प्रतिरूपं मम नाम साम्प्रतम्।
भजते सहधर्मिणीपदं गहनेयं महतां विधेर्विधा ॥१४७॥

अस्य सानुशयस्य। नामेति प्रसिद्धौ। साम्प्रतं मत्यागकाले॥ यद्वा युक्तं पश्चात्तप्तस्य प्रायश्चित्तायमानत्वात्। स्वाभिन्नत्वेनाध्यवसिताया: प्रतिकृते: पूजनीयतालाभ: स्वात्मगामीति भजत इत्यात्मनेपदम्। सन्निहितं स्वं त्यक्त्वा स्वप्रतिकृतिं मानयतो रामभद्रस्य हार्दमविज्ञाय सविस्मयं तद्व्यापारं समर्थयते —गहनेयमिति। यथोक्तं "लोकोत्तराणां चेतांसि" इत्यादि। ईदृशस्येतरानिर्वाह्यत्वं व्यङ्ग्यम्। विस्मयेन हर्षोद्गम: ॥ १४८ ॥

राजव्यापाराणां कृच्छ्रसाध्यतां विचिन्त्य सविषादहर्षमाह—

इह नीतिगतिर्विसङ्कटा परतन्त्रा बत ! ते नरेश्वरा: ।
स तु मां निरवासयत् पति: प्रतिमां मे परिपूजयत्यपि ॥१४८॥

इह राजलोके, तदनुष्ठेयेति यावत्। विसङ्कटा दुरनुष्ठाना। कुत: ? तत्राह —परतन्त्रा इति। नरेश्वरत्वेऽपि पारतन्त्र्यमिति विरोधध्वनि:। अपिर्विरोधे निर्वासनपरिपूजनयो:। परिवादप्रणयतिशयहेतुकत्वेन तत्परिहार:। अत्यन्तमीर्ष्यानिवृत्तिर्गम्यते ॥ १४८ ॥

तामेव हर्षविस्मयादि भावानुभावसात्त्विकभाववर्णनेन कविराविष्कुरुते—

सुषमा विससार काप्यथो ललिताङ्ग्या मृदुगण्डयोस्तदा ।
पुलकोऽप्युदगाद्यवाङ्कुर: पुलिने काञ्चनसैकते यथा ॥१४९॥

अथो अनन्तरमेव। कापि निर्वचनमतिक्रान्ता। काञ्चनसैकत इत्यनेनेषत्पाटलत्वं गण्डयोर्गम्यते। उपमयाऽन्योन्यशोभाधायकत्वलक्षणान्योन्यालङ्कारध्वनि: ॥ १४९ ॥

हर्षोद्गमेन चिन्तायाः प्रसक्तायां विरतावविरतिं तद्दार्ढ्यगमिकामाचष्टे—

अनतिक्षुभिता स्थिता तदा प्रतिबद्धा पृथुलानुकम्पया ।
जनकात्मभुवो हृदोऽवहन्नवचिन्तावनवाहिनी मुहु: ॥१५०॥

अनतिक्षुभिता ईर्ष्यापगमात्। रामस्य शोकेन समानशोकत्वात् पृथुला-

नुकम्पयेति। जनकात्मभुव इत्यनुकम्पाप्रयोजकं कुलीनत्वविनयवत्त्वादिकमुक्तम्। नवा पूर्वचिन्तातो विभिन्नत्वभावा। अविच्छिन्नप्रसरत्वाच्चिन्तैव वनकल्लोलिनीति ईर्ष्यादिकालुष्यराहित्यं गम्यते। हृदः पर्वतरूपणं गम्यमित्येकदेशविवर्त्ति। अपरिच्छेद्यस्वभावत्वं ध्वन्यते। मुहुरविरामेण ॥ १५० ॥

इत्थं मत्वा स्थिरीकृते रामस्य निरपराधित्वे, प्रणये चाविच्छिन्ने प्रवहति, उभयोः शोके साधारणीकरणव्यापारमहिम्ना एकाकरतामुपगते चासन्निहितमपि तं साक्षात्कुर्वाणेवाह —

तदवैमि यदस्त्युपग्रहो बत ! नीतेर्निलयान्तरे भवान् ।
बहिरुद्धतमीक्ष्यते क्षतं निजहस्तेन गतः सदेति च ॥१५१॥

तच्छब्दं यच्छब्दघटितवाक्येन विवृणोति —यदित्यादिना। नीतेः राजनिर्वाह्यनीत्यधीने नेलयान्तरे पारतन्त्र्ये। उपग्रहः उपगृहीतः अधीन इति यावत्। अथवा नीतेः निलयान्तरे नीत्यभिन्ने कारागारान्तः। राहोः शिरः इत्यत्रेव षष्ठी। शेषं पूर्ववत्। अस्ति अवतिष्ठते। उद्धतो धीरः। ईक्ष्यते जनैरिति शेषः। आकृतिविशेषेण धीरो निश्चीयते, अन्तस्तु शोचन् वर्त्तत इत्यर्थः। अत्र ज्ञापकम्—क्षतमित्यादि। निजहस्तेनेति। स्वयं सम्पादितमनर्थमनुभवन्निति भावः। अत्र ललितं निदर्शना वा ॥

धीरस्य शूरस्य च कथमनुतापः ? कथं वा परीषादापकरणाऽसामर्थ्यम् ? अत आह—

मनुजस्य तिरोभवेदपि प्रतनाचारबलात् स्ववैभवम् ।
विहगश्चिरबन्धने स्थितो निजशक्तिं गरुतोऽपि विस्मरेत् ॥

मनुजस्येति जातावेकत्वम्। तिरोभवेत्। अपीति लिङर्थसम्भावनोपोद्बलकम्। सम्भावनया तिरोभावविपरीतकोटेः प्रत्यक्षीभावस्य अत्यन्तातिरस्कारः सूचितः। प्रतनो विस्तृतः, सर्वविदित इति यावत्। स्वमसाधारणं

वैभवं कर्मसु कौशलम् उक्तं सामान्यं समर्थयते —विहग इति। तथाच रामे धैर्यशौर्योत्तिरोभूतत्वादनुतापपरीवादापाकरणयोरसामर्थ्यमिति। प्रतिवस्तूपमाप्रस्तुतप्रशंसे अत्र ॥ १५२ ॥

अधीरतां प्रपञ्चयति—

प्रियया तनुभिश्च शाबकैर्विपिनान्यध्युषितानि संस्मरन्।
स्वयमुद्गल एव पञ्जरे प्रयतः सम्प्रति सम्भ्रमेद् भवान्॥

उद्गल उन्नमितकण्ठः सञ्जातोत्कण्ठश्च एव पञ्जर एव इत्युपत्रैवकारसम्बन्धः। पञ्जरशब्देन राजनयनिगरणम्। रामीयस्वच्छन्दव्यापारविरोधिनि पारतन्त्र्ये वर्णनीये तादृशविहगव्यापारवर्णन निदर्शना ललिते वा। अत्र रामस्य शोकेन सीतायाः स उद्दीपितः ॥ १५३ ॥

प्रस्तुतमेवाऽप्रस्तुतविहगवृत्तान्तं निगमयन्नेव रामस्य वैक्लव्यातिशयं प्रख्यापयति —

निनदं निशमय्य कञ्चन व्यथया कान्तिमवेक्ष्य काञ्चन।
गरुतौ प्रविचाल्य तिष्ठसि भ्रमसि त्रोटिपुटे प्रसार्य वा॥१५४॥

कञ्चन सर्वलोभनीयम्। निनदशब्देन आह्लादप्रयोजकं निगीर्णम्। निशमय्य साक्षितयाऽनुभूय। कांचन हृद्याम्। तिष्ठसि उत्सुको वर्त्तसे। यथोक्तम् "रम्याणि वीक्ष्य मधुरांश्च निशम्य शब्दान् पर्युत्सुकीभवती"ति। भ्रमसि रणरणिकामनुभवसि। अलङ्कारभावौ पूर्ववत् ॥ १५४ ॥

अनिवार्यरुजाकुलो भवान् निजतल्पेऽपि विवर्ततेऽथवा।
करुणं प्रलपत्यथानिशं विवशः स्वप्नमवेक्षतेऽथवा॥१५५॥

अपीति वर्त्तमानकालिककियाणां सम्भावनां द्योतयति। अथेत्येवार्थे विप्रलम्भशोकसाधारण्यो जागराद्यवस्थाः प्रतिपादिताः ॥ १५५ ॥

उक्तरामावस्थाया व्यतिरेकमाह—

सुकरा दयितादिरक्तता, सुसहः स्याद्विरहोऽपि दुर्गतः ।
परमीदृशकृत्यनिष्ठया महितस्त्याग इहाऽन्यदुर्लभः ।।१५६।।

सुकरा सुसम्भवेत्यर्थः । "कृभ्वस्तयः क्रियासामान्यवचनाः" इति महाभाष्यात् । दुर्गतः दुर्दैवनिमित्तः । विरहः प्रेममूर्च्छितः शोकः । परमिति विशेषे । तं वाच्यतया स्फुटयति —ईदृशेत्यादिना । ईदृशकृत्यनिष्ठया समुचितधार्मिकव्यापारोत्साहेन उपलक्षितः । अत एवान्यदुर्लभः । अत एव महितः पूज्यतां गतः । अत्र प्रशंसानुविद्धोऽनुतापो रामविषयको गम्यः ॥

त्यागप्रयोजकं राघवीयं धैर्यं प्रशंसति—

मुकुटं तदुदस्य याचतां, स्वतनुं मुञ्चतु वा परार्थतः ।
इदमेव यथा प्रजाहितं भरणं तद् धरणेः सुदुष्करम् ।।१५७।।

तद् राजसामान्यललितम् । स्वां राजत्वादपि प्रेष्ठां तनुम् । परार्थं मुकुटत्यागपूर्वकयाचनं स्वतनुमोचनञ्च हरिश्चन्द्रजीमूतवाहनादौ दृष्टचरमिति तदुभयमप्यनुमन्यते मया, इदन्तु मे विस्मयमावहति यत् प्रजाभिलाषमनतिक्रम्य दुर्भरो भूभारो निरुह्यते रामेणेतीति भावः ॥ १५७ ॥

नाऽसंयतचित्तेन धरणीभरणं सुकरमिति राघवस्य तत्त्वं प्रशंसति—

अतुलात् स्वयमादिशीलनाद् व्रतिभिर्वा महितो महानयम् ।
जनरञ्जनधर्मदीक्षयाऽप्यतिवर्तेत समस्तराजकम् ।।१५८।।

स्वस्यानन्यसाधारणस्य यमादेः शीलनात् । अत एवातुलत्वम् । व्रतिभिः शरभङ्गादिभिः । वाशब्दोऽवधारणे महितान्वयी । दीक्षा श्रद्धा प्रवृत्तिः । इदानीन्तनावस्थाया अनिश्चयात् सम्भावनायां लिङ् अतिवर्त्तेतेति । राजकं राजसमूहम् ॥ १५८ ॥

प्रस्तुतो रामव्यापारः सामान्यसमर्थकोऽप्यभूदित्याह—

महते तपसेऽस्तु जीवितं कृतिनां नो स्वसुखाय केवलम् ॥
सततं विपदं समेत्ययं स परार्थाय जगत्त्रयोत्तरः ॥१५९॥

विपदं सततं समेति विपदुत्तरमपि विपदमनुभवति। विपदमिलीप्सिततमं कर्म। तेन परार्थत्वेन काम्यता गम्यते। अत एव जगत्त्रयोत्तरः। सोऽयमिति प्रत्यभिज्ञा दर्शिता ॥ १५९ ॥

विपन्मग्नमात्मानं राघवञ्च विचिन्त्य जीवितस्यारक्षणीयतां निश्चिनोति-

तृषितानि सदेन्द्रियाणि तान्युपलाल्यापि निराशमेव यत् ।
तदिदं मृतिभीतिपीडितं श्वसितं नो गणयामि जीवितम् ॥

सदा तृषितानि, यथोक्तम्—"न जातु कामः कामानामुपभोगेन शाम्यति। हविषा कृष्णवर्त्मेव भूय एवाऽभिवर्धते" इति। तानीत्युक्तरूपेण प्रसिद्धिमाह। उपलाल्यापि प्रियतरतत्तद्विषयार्जनेन सन्तर्प्यापि। निराशमेव, अर्थात्तृषाशान्तौ। जीवितृनिष्ठं निराशत्वमारोपितं जीविते यावज्जीवनिराशत्वख्यापनाय। तदिदमस्मादृशैरनुभूयमानम्। श्वसितं श्वासक्रियामात्रफलकम् न केवलमिष्टाफलकम्, किन्त्वनिष्टफलकमपीत्याह —मृतीत्यादि। अत्राप्यारोपस्याभिप्रायः पूर्वक एव। न गणयामि न रक्षणीयताबुद्धिं विदधे। अत्र प्रत्या निर्वेदः शान्तसञ्चारी परां कोटिमारोपित इति देहत्यागात्मककार्यसङ्ग्रहरूपमङ्गम् ॥ १६० ॥

त्यागाद्दुर्भरभूभरणाच्च राघवस्याराध्यत्वमपि सम्पन्नमित्याह—

अतिमानुषशक्तिरप्ययं यमशाली यमिनोऽपि राघवः ।
अतिभासुरधर्मदीपकः स तु वन्द्यो मम सर्वथा महान् ॥१६१॥

अतिमानुषशक्तिः, सेतुबन्धविभीषणाऽभयप्रदानादेः। तथात्वेन कथमविमृश्यकारिता तस्मिन् सम्भाव्येति अपिशब्दः। यमिनोऽपि यमिसामान्यमपेक्ष्याऽपि। यमशाली प्रशस्तयमवान्। अन्त्याऽश्रमस्वीकर्तृ रघोः कुले

जातस्य यमित्वं युक्तमित्यभिप्रायेण राघव इति। अत एव परिभासुरस्य प्रकृष्टफलप्रदातुः धर्मस्य दीपकः स्वयमनुष्ठानेन प्रकाशकः। दीपरूपेण परोदेशेन प्रवृत्तिः सूच्यते। अतः सर्वथा महान् पूजनीयः। तद्विषयक-मीर्ष्यादिकं ममानुचितं संवृत्तमिति विषादः ॥ १६१ ॥

व्यञ्जनास्पदीकृतां रामस्य निदर्शनतां प्रमोदातिशयाद्वाच्यतां नयन्त्याह—

यदिवाऽतिविभिन्नकालादिक्स्थितिभिर्नीतिरतीव भिद्यते।
क्षितिनाथ! परार्थजीविनामतुलं नित्यनिदर्शनं भवान्॥१६२॥

यदिवेति। यद्यपि कालभेदादेशभेदाच्च राजकीया जनकीया चाचार-प्रयोजिका नीतिर्विभिन्ना भवतीति जनहितानुरोधी मत्त्यागो युक्तो वाऽयुक्तो वा भवतु, तथापीत्यर्थात्। परार्थमेव जीवतां तादृशं जीवितं निर्वोढुमिच्छतामिति यावत्। नित्यनिदर्शनम्, भवादृशस्येतरस्याभावात्। "अन्यप्रसिद्धं यशसे हि पुंसामनन्यसाधारणमेव कर्म" इत्युक्तदिशा भवदीयस्य यशःशरीरस्य स्थायितया युक्ता ते क्षितिनाथत्वे सार्वदिकी दृष्टान्ततेति भावः। पूर्वत्राऽत्र च रामगुणाविष्करणात्मकं विचलनमङ्गम्। इत्थं साङ्गेऽस्मर्शे निबद्धैः शान्ताङ्गैर्भावैः गर्भे रामादिविषयकमीर्ष्यादिभावजाते बाध्यत्वेनाऽभिप्रेतत्वेनिबद्धं बाधितमवगन्तव्यं सहृदयैः॥ १६२ ॥

इत्थं निश्चिते रामस्यानगस्त्वे, स्वकृतस्य दोषारोपस्य क्षान्तिं प्रार्थयते—

क्षुभितेन्द्रियया मयाऽधुना यददृश्यन्त कलङ्कबिन्दवः।
अभिमानविमोहिते विभो! स्वकलत्रे कृपया क्षमस्व तत् ॥

क्षुभितेन्द्रिययेति भ्रान्त्यात्मके दर्शने क्षन्तव्यत्वे च हेतुः। मया वैक्लव्य-मनुभवन्त्या। अधुना, नेतः पूर्वमित्यचिन्तितभवत्प्रभावाया एकोऽपराधो

मर्षितव्य इति व्यज्यते। बिन्दुरूपणं कलङ्कानामल्पतां द्योतयति। स्वं निमित्तीकृत्य राक्षसवंशोन्मूलनात् प्रेयसः प्रेमातिशयं विचिन्त्य योऽभिमानस्तेन विमोहिते तत्त्वनिरीक्षणासमर्थीकृते स्वकलत्रे क्षान्त्यर्हं। विभो! सर्वशक्त! शक्तानां भूषणं क्षमा। सन्तु क्षान्तेर्हेतवः, तेषामभावेऽपि सा युक्तेत्याशयेन कृपयेति। काकादिन्यपराधिन्यपि दृष्टपूर्वयेति भावः। क्षमस्वेति प्रार्थनायां प्राक्काले च लोट्। क्षान्तिः प्रार्थिता प्राक्काला चेत्यर्थः। इतः प्रभृति निर्वहणसन्धिः। मुखादौ शमोद्देशेनानुस्यूतायाश्चिन्तायां नायिकायां सीतायामुपनायकादिषु श्रीवाल्मीक्यादिषु च विद्यमानानामङ्गनाश्चात्यन्तिकदेहत्यागात्मकमुख्यफलानुगुण्येन विन्यासात्। अत्र तु श्लोके पर्युपासनात्मकः प्रसादोऽङ्गम्। प्रसादनोपयोगिस्वापराधविवरणन्तवागामिभिस्त्रिभिः कृतश्चेत्यवधातव्यम् ॥ १६३ ॥

क्षान्तेः प्रार्थनयापि मनसः स्वास्थ्यमलभमानोऽहमानमेवोपलभते—

चरितं मम निन्द्यमस्त्यहं सुचरित्रापि निरूप्यते यदि ।
अनयं बहुवारमेव तं परितापामिषतां मम प्रियम् ॥१६४॥

मम चरितं निरूप्यते यदि निन्द्यमास्त निन्द्यत्वेन भाति। सुचरित्रा चेत्वं कथं निन्द्या? तत्राह — अनयमिति। प्रियेण साकं वनवासाय प्रस्थानादापतितानां विपदां स्मृतेः परितापनयने बहुवारत्वमुक्तम्। प्रियमपरितापनीयम् ॥ १६४ ॥

स्वचरितस्य निन्द्यतायां हेत्वन्तरमाचिनोपि--

कति वा पुरुदुःखपीडिता मम हेतोर्विधवाः कृताः स्त्रियः ।
कति वा शिशवोऽपि तापिताः पितृमृत्याऽशरणाः कृतास्तथा ॥

कति वा इयत्तया गणनामतिक्रान्ताः। मम हेतोरिति सन्तापस्य हेतोः स्नातीतिवद् "षष्ठी हेतुप्रयोगे" इति षष्ठी। । ममैकस्या दुःखं निवर्त्ति-

तुमित्यर्थः। स्त्रीणां वैधव्यसम्पादनम्, तच्छिशूनां पितृवियोजनेन तापनञ्च स्वस्य पतिवियोगं सुतयोः पितृलालनाऽलाभञ्च व्यदधातामिति भावः। अत्र मृताद्यालम्बनः शोकः प्रतीयते ॥ १६५ ॥

कर्मविपाकस्य गहनत्वात् कथमिदं निश्चितं भवत्या ? तत्राह—

यदिवाऽनिलवत् स्थिरेतरः सुदुरूहोऽपि स नीतिसङ्ग्रहः।
कटु कर्मफलं कलम्बवन्निजलक्ष्ये कुरुते क्षतं द्रुतम् ॥१६६॥

यदिवा यद्यपि। नीयते फलमनयेति नीतिः धर्माधर्मात्मिका तस्याः सङ्ग्रहः सञ्चयः। अनिलवत् स्थिरेतर इत्यसम्भावितफलदानशक्तिर्नीतावुपपादिता। अत एव सुदुरूहः। अपि तथापि। कलम्बवत् शरेण तुल्यम् कटु दुस्सहम्। कर्मणः तत्तत्फलहेतोर्व्यापारस्य बाणसन्धानरूपस्य च फलम्। निजलक्ष्ये स्वसम्बन्धार्हे प्राणिवर्गे शरव्ये च। क्षतं स्वस्वविषयकफलानुभवं छेदञ्च। मुक्तेषुवत् प्रारब्धस्वकर्मफलमवश्यं भोक्तव्यमिति मतिर्गम्यते ॥ १६३ ॥

स्वापराधप्रमार्जनं देहत्यागेनैव प्रायश्चित्तेनेति हृदि गूढं निधायाह—

विशिखा ! निशिता विरम्यतां क्षतमेयात् स्तिमितं न मे मनः।
पुरतो मम लोकचक्र ! मां त्यज सीतामिह तां हतामहो ॥

विशिखा इति दुष्कर्मफलानि निर्गीर्य सम्बोध्यन्ते। निशिताः दुस्सहाः। विरम्यतामिति प्रार्थना। यतो मे चिरानुभूतदुःखधारायाः। मनः स्तिमितं दुःखसंवेदनार्हतामतिक्रान्तम्। न क्षतमेयाद् आविर्भावेऽपि युष्माकमनुभवं नाप्नुयात्। लोकचक्र ! अलातचक्रवद् बम्भ्रम्यमाणलोक इह अस्यामवस्थायाम्। तां बहुशः प्राणिदुःखदात्रीम्। त्यज मा त्वन्मध्यवर्त्तिनीमनुमन्यस्व। अनेनोत्तराभ्याञ्च कर्त्तव्यान्वेषणरूपो विबोधोऽङ्कम् ॥

देहत्यागस्यौचित्यं व्यनक्ति—

नहि देहिनि शोभनं भवेच्चरितार्थे सति जीवितं पुनः ।
सुतरां नटने समापिते स च रङ्गाद्विरमेत् कुशीलवः ।।१६८।।

चरितार्थे उपभुक्तकर्मफले। पुनश्चरितार्थतानन्तरम्। शोभनमभिनन्दनार्हन्नहि। अत्र दृष्टान्तः —सुतरामित्यादि ॥ १६८ ॥

अथ धीरा निश्चितस्य कालान्तरासहिष्णुतां सदृशव्यापारद्वयेन व्यनक्ति —

इतरेषु वितीर्य कानने स्वधनान्यन्तमयन्ति शालयः ।
जलधेः सलिलेषु शुक्तयो विलयं यान्ति वितीर्णमौक्तिकाः ।।

इतरेषु वप्तृषु तद्भिन्नेषु वा। रघुवंशाङ्कुरद्वयोत्पत्त्या प्रजायै गृहमेधित्वरूपा वंश्यधर्मो निर्व्यूढ इति भावः। प्रथमेन प्रजानां पुत्राधीनयोगक्षेमकत्वम्, द्वितीयेन तासां शाभाधायकत्वञ्च व्यञ्जितम्। अत्र निर्वेदातिशयो व्यङ्ग्यः॥१६९॥

स्मितोऽभिदत्ते शमातिशयं स्वस्मिन्ननुसन्दधाना चरितार्थतां प्रकटयति–

विशदं हि विभाति मे मनोगगनं, बुद्धिरुदेति भासुरम् ।
परमुल्लसतीयमम्बुधौ प्रवहन्ती विमला तरङ्गिणी ।।१७०।।

वैशद्यं मनसि राजसमसवृत्तिशून्यत्वम्, गगने तु विर्मेघत्वम्। मनसो निश्चलत्वादि गम्यम्। अन्तःकरणत्य सङ्कल्पादिमत्त्वे मनस्त्वम्, निश्चयादिमत्त्वे बुद्धित्वमित्यौपनिषदसिद्धान्तानुसारेण भेदोक्तिः। भासुरं तत्त्वनिर्णयसमर्थं यथा तथा। विमला रागादिशून्या षड्गादिशून्या च। इयमिति बुद्धिमुद्दिश्य तरङ्गिणीत्वविधाने रूपकं तरङ्गिणीविशेषणत्वे त्वतिशयोक्तिरिति साधकबाधकाभावात्तयोः सन्देहसङ्करः। अम्बुधौ प्रवहन्ती समुद्राभेदम्, अपरिच्छिन्नात्मस्वरूपञ्च लभमाना। परमुल्लसति केवलानन्दाकारवृत्तिमती भवतीति जीवन्मुक्तावस्थापरामर्शः। अतो वाञ्छितात्मिरूपानन्दःखनिर्गमरूपसमयश्चात्र प्रकरणेऽङ्गे बोध्ये ॥ १७० ॥

निश्चितदेहत्यागोपासितपूर्वान् नमति कतिभिश्चित्—

इयमस्तु नतिर्ममान्तिमा दिनसाम्राज्यपते दिवस्पते! ।
कनकांशुशरौघधारिणे भवते दुष्टासहप्रदीप्तये ॥१७१॥

अस्त्विति प्राप्तकाले लोट्, नतु प्रार्थनायाम् नन्वया आप्तकामात्वात्। अन्तिमा आगामिसायङ्काले नत्यवसरालाभात्। दिनसाम्राज्यपते! लोकानां कृत्येषु प्रवर्तकत्वात्। यथोक्तमादित्येषण "सवितर्युदिते करोति कर्माणि लोकोऽय"मिति। दिवस्पते! सूर्य। रवर्पते! इति तु गम्यते। अतिशयित-सुखदत्वञ्च। सम्राट्त्वोपपादकं कनकेत्यादिविशेषणद्वयम्। स्त्रीणां परिणीतेः परं भर्तृकुलेष्टदेवतैव परा देवतेति सूर्यस्यादौ नतिः ॥ १७१॥

सुसिताम्बर वन्द्य वृद्ध भो बिसिनीतन्तुमरीचिकैशिक ।
लसितस्मित चारुचन्द्रिकाभसितस्नात मृगाङ्क! ते नमः ॥

सुसितमम्बरं येन, सुसितमम्बरं वस्त्रं यस्येति च। वृद्धत्वमाकारतः, वयस्तोऽपि गम्यते, तदुपपादकम् —बिसिनीत्यादि। बिसिनीतन्तव इव मरीचयः कैशिकं यस्य सः स्मितं हासः प्रकाशश्च। वृद्धतापसचित्तदया-धीनमृगपोषकत्वं मृगाङ्कपदेन गम्यते। अत्र जनकवंशैर्गम्यत इति ये वदन्ति ते दशरथनत्यनुक्तेर्हेतुं प्रष्टव्याः ॥ १७२ ॥

निजगाः प्रविचार्य दूरतो गहनं सन्तमसं विदार्य याः ।
स्वमहांस्युपदर्शयन्ति नः शुभतारा! भवतीर्नमामि ताः ॥

गावो रश्मयो वाचश्च। प्रविचार्य व्यासा विधाय उच्चार्य च। सन्तमसं गाढान्धकारमज्ञानञ्च। "अवसमंधेभ्यस्तमसः" इत्यच् समासान्तः। विदार्य विनाश्य, उत्तरकालानुवृत्तिं विघटय्य च। नः तमोवृतान् संसारिणश्च। स्वान्यसाधारणानि महांसि तेजांसि विज्ञानानि च। शुभाः शुभफलप्रदाः। ताराः। विज्ञानदातृव्यापारप्रतीतेः समासोक्तिः।

इह सायमुषस्सु चाऽन्वहं वयमाना शबलांशुकानि या ।
छदतेऽम्बरवेश्मतोरणं प्रियसन्ध्ये ! भवतीं नमामि ताम् ।।

इहाऽस्मिन्नेव लोके । अन्वहम्, नित्यनूतनं यथा तथेति भावः । शबलानि चित्राण्यँशुकानि सूक्ष्मान् अंशून् रश्मीनेव च्छादनपटान् वयमाना रचयन्ती । अम्बरस्यैव वेश्मनस्तोरणं बहिर्द्वारम् । छदते "छद् अपवारणे आधृषीयः खरितेत् । आच्छादयतीत्यर्थः । मनोज्ञवस्तुनिर्माणात् प्रिया सन्ध्या । श्लेषमङ्गीकृत्यैकदेशविवर्त्तिरूपकम् ॥ १७४ ॥

रमणीयवनालयो ! रणद्भ्रमरव्याकुलसूनराजयः ।
बहुधा भवतीषु याऽरमे, विरमामीयमहं प्रणम्य वः ।।१७५।।

रमणीयानां वनानामालयः पङ्क्तय एव सख्यः ! । रमणीयत्वे हेतुः—रणदित्यादि । बहुधा अलम्भावविरहात् भवतीष्वादरणीयासु अरम इति च्छेदः । विरमामीति वर्त्तमानसामीप्ये भविष्यति लट् "ण्यङ्परिभ्यो रमः" इति परस्मैपदम् । कृतज्ञता प्रकटिता ॥ १७५ ॥

अथानुष्ठितामापृच्छां लोकान्तरगत्यसम्भवप्रतिपादनेनाक्षिपन्त्याह—

अथवाऽतिमनोहराद् बहिर्जगतो मे विरहो न सम्भवेत् ।
अवनौ च तनुर्मनोरथो मम चैषां सुषमासु लेष्यते ।।१७६।।

अतिमनोहराद् हृदयरञ्जकात् । जगतः भौतिकादस्माल्लोकाद् बहिः । विरहो वियोगः न सम्भवेत् । कुतो न विरहः ? मृतानां लोकान्तरगतिश्रुतेः । अत आह —अवनौ चेति । एकश्चकारोऽधिकरणयोः, अपरः कर्त्तृश्च समुच्चायकः । एषां दिवस्पत्यादीनाम् । तथाच संसारिणामिव न मे जन्मान्तरप्रयोजिका मृतिः, अपि तु मुक्तिरेवेति न लोकान्तरप्रसक्तिः । तथाच श्रुतिः — "यत्र त्वात्मे" त्यादिः, "न तस्य प्राणा उत्क्रामन्ती" त्यादिश्च ॥ १७६ ॥

मातरं सर्वधात्रीं सप्रार्थनं निवेदयति—

जनयित्रि ! विलोकयाम्यहं भवतीं मां दधतीं सुवत्सलाम् ।
निजमञ्चभुवं समुज्ज्वलामुपायान्तीमनघे वसुन्धरे ! ।।१७७।।

योगिनां छन्दमृत्यूनां प्रणविलय,नन्तरं देहघटका भौतिकास्तत्तद्भूतेषु लीयन्त इति स्वशरीरस्य पृथिव्यां लयः पर्यायोक्तमर्यादयाऽऽह्नोक्तः ॥ १७७ ॥

अथ विदेहमुक्त्यवस्थां प्रतिपादयति कतिभिश्चित्—

गिरिनिर्झरशान्तिगायनं शयिताहे निशमय्य तद्दरे ।
सविधेतरुगुल्मसन्ततिः करिता सूनतति ममोपरि ।।१७८।।

*गायनं गानम् तद्दरे गिरिदर्याम् । दरीकन्दर्यादयश्शब्दास्त्रिलिङ्गा इति वैजयन्त्याम् । शयिताह इत्यनद्यतनभविष्यति लुट् । तथा करिता इति कृधातोः । यद्यपि विदेहमुक्तस्य न गानश्रवणाद्युपपद्यते, तथापि "अन्धो मणिमविन्दत् । तमनङ्गुलिरग्रथत् अश्रीवस्तं कण्ठे धृतवान् । तमजिह्वोऽस्तौत्" इतिवद् "शब्दज्ञानानुपाती वस्तुशून्यो विकल्पः" इति योगसूत्रग्रथित-विकल्पाख्यवृत्तिविषयमसन्तमर्थं परिकल्प्योच्यते । एवमुपर्यपि ॥ १७८ ॥

डयिता विकिरालिरम्बरे परितो गास्यति मञ्जुलस्वना ।
घनवृन्दविलोलशाद्वले हरिणानां निवहोऽपि नर्त्तिता ।।१७९।।

डीङ् विहायसा गतौ इत्यतो लुट् डयितेति । विकरः पक्षी । घनवृन्दसदृशे विलोले च शाद्वले नर्त्तितेति सम्बन्धः ॥ १७९ ॥

अथ सानुनि धातुसंहतिर्नवरत्नावलिरप्यनारतम् ।
मम दास्यति कौतुकं मुहुर्भविता तन्निखिलं हि मामकम् ।।

अथेत्यपिचेत्यर्थे । कौतुकदानं समर्थ्यते — भवितेति । हि यतः । प्रसिद्धोऽयमर्थ इति वा । प्रसिद्धिश्चोपनिषदादिषु ॥ १८० ॥

वसुधे ! भवदङ्गतल्पके परिरन्तास्मि सुषुप्तिनिर्वृता ।
नहि नह्ययवा ममाम्बिके ! प्रणिपत्योत्पतितास्म्युपर्यहम् ।।

* cfr Dictionary by M. Williams

भवत्या अङ्क उत्सङ्ग एव तल्पस्तत्र। कप्रत्ययेन मृदुलत्वादिकमुक्तम्। सुषुप्तिः स्थूललिङ्गशरीरलयपूर्वकाज्ञानोपाधिकी जीवचैतन्यावस्था यस्यां स्वात्मानन्दाकारा वृत्तिरज्ञानस्येत्यद्वैतिनः। तया च निर्विषयसुखानुभवमात्रमत्र विवक्षितम्। परिरन्तास्मीति परस्मैपदं "व्याङ्परिभ्यो रमः" इत्यनेन। सौषुप्तसुखानुभवसाम्यबोधनं मुक्तसुखस्यापकर्षापादकमित्याशयेन निषेधति -- नहि नहीति। अत्यन्तानिष्टव्यञ्जिका द्विरुक्तिः। ममाम्बिक इति दुरुच्छेदत्वान्मातृस्नेहस्य। प्रणिपत्य शरीरं त्वय्यर्पयित्वा। उपर्युत्पतितास्मि अज्ञानमप्यपास्य विदेहमुक्ता भवितास्मि॥ इतरैर्नम्यानामपि योगिनां माता नन्तव्येति यथाश्रुतोऽप्यर्थो विवक्षित एव। अत्रोत्तरत्र च कृत्तकर्मपाशस्य जीवस्यालौकिकाकाशगमनं मुक्तिरिति दिगम्बरमतं शब्दशक्त्या प्रतीयते॥

उक्तामेव स्थितिं प्रेष्ठतया पुनरप्यन्यथा प्रतिपादयति—

तटिनीजलबिम्बिता धरां प्रणमन्ती विमलेव तारका।
भवदङ्घ्रिलयं गताऽप्यहं दिवि काचिद् भवितास्मि दीपिका॥

उपमयाऽनश्वरत्वनिर्लेपत्वादिकमात्मनो दर्शितम्। दिवि आकाशे, तद्वद् व्यापके स्वयंप्रकाशे चैतन्ये च। काचिद् एका वाग्व्यवहारमतिक्रान्ता च। दीपिका दीपवत् स्वयंप्रकाशचैतन्यरूपा भवितास्मि। दिवि दीपिकेत्युपमेयपक्षे "दाने कर्णसम" इतिवत् सप्तमी॥ १८२॥

स्थिरविरागाधीनशमसम्पादनेन परमपुमर्थमुक्तिलब्धये स्वत्यागेनोपकर्त्तारं राममामन्त्र्याह—

प्रिय राघव! ते नमो, भवद्भुजशाखाश्रयणादुदेम्यहम्।
अभयं पुनरुड्डये स्वयं विशदेऽस्मिन् गगने विनाश्रयम्॥१८३॥

भवानेव परमात्मा वृक्षः तस्य भुज एव शाखा तस्याश्रयणादुपासनारूपाद् उदेमि ऊर्ध्वं गच्छमि निस्संसारा भवामि। कथं निस्संसारात्वम्?

तत्राह —अभयमिति । विशदे अज्ञानमलसम्बन्धशून्ये । अस्मिन् साक्षितया भासमाने गगने तद्वद् व्याप्तब्रह्मचैतन्ये । अभयं यथा तथा । पुनः सविशेषम् । विशेषश्च पुनरावृत्तिशून्यत्वरूपः । उड्डये ऐक्यमाप्नोमि । लड्भ्यां भावि-नोऽपि सिद्धप्रायतोक्ता ॥ १८३ ॥

तादृशं ब्रह्मैव परामृशति—

क्रियते हि ययाऽण्डमण्डलं नहि सा स्थूलमृदत्र विद्यते ।
दिनरात्रिविहीनमुल्लसत्यनघं शान्तमिदं परम्पदम् ॥१८४॥

यया स्थूलमृदा । उपलक्षणमिदमितरेषां जडानाम् ॥ अत्र असङ्गे ब्रह्मणि सा स्थूलमृद् जडजातमिति यावत् । नहि विद्यते नैव सत्तां लभते. निश्चितं मिथ्यात्वादिति भावः । दिनरात्रिविहीनम्, दिनकरादेरपि वस्तुतोऽ-सत्त्वात् । अनघं रागादिदोषरहितम् । शान्तं निर्धर्मकम् । इदं निर्विकल्पक-वृत्तिविषयचिद्रूपम् । पदं पदनीयं प्राप्यमित्यर्थः । अत्र पूर्वत्र च सिद्धतया परामर्शेन स्थिरीकरणात् कृतिर्नामाङ्गम् ॥ १८४ ॥

न केवलमहम्, भवानपि मदूरीकृतयैव पदव्या मत्प्राप्तं पदं प्राप्स्यतीत्याह—

रुजया परिपक्वसत्त्वभा निजभारान् परिहाय पुण्यतः ।
अजपौत्र ! भवानिदं पदं भजमानैकविभाव्यमेष्यति ॥१८५॥

परिपक्वभा विमलान्तःकरणः । निजान् आत्मीयत्वेनारोपितान् भारान् क्लेशफलकान् विषयान् । परिहाय निर्वेदादिना त्यक्त्वा भजमानैकविभाव्यं वाग्यविषयं स्वप्रकाशम् । सम्पादनीयार्थस्थिरीकरणरूपं यथनमङ्गमत्र ॥१८५॥

इत्थमुभयोरात्यन्तिके देहवियोगे निश्चिते पूर्वकावस्थानां मनसि प्रतिबिम्बितत्वेन देवी ईषत्कर्मपाशबद्धा सती सांसारिकीमवस्थामन्व-भूदित्याह कविः—

त्रसति स्म तनुर्मृदुस्तदा तरसोत्कम्पमियाय जानकी ।
स्फुटमित्यवदत् ससम्भ्रमं सुगिरां शब्दविचारसङ्कराम् ॥

सुगिरामित्याबन्तम् शब्देन गद्गदस्वरात्मकेन विचारेण च सङ्कीर्णाम् ॥१८६॥

त्रासादिहेतुं विवृण्वत्याह—

किमियं पुनरप्युपेत्य मत्पुरतः साक्ष्यमपि प्रकाश्य मे ।
महिषी च भवेदितीहितं ? नृपतेरस्म्यपि सालभञ्जिका ? ॥

इयं मत्कलत्रतया मदाज्ञानुवर्त्तनार्हा । पुनरिति साक्ष्यप्रकाशनस्य वृत्तपूर्वत्वेनानौचित्यं गमयति । चकार एवार्थे । भवेदेवेत्यर्थः । विधौ लिङ् । नृपतेः प्रभुत्वाभिमानिनः । गूहितामनर्हतां सालभाञ्जिकात्वरूपणाक्षेपेण स्फुटयति नाहं कृत्रिमपुत्रिकेव केवलमुपभोग्येति ॥ १८७ ॥

ईषत्स्फुरितामीर्ष्यां मत्या निवारयन्ती क्षान्तिं प्रार्थ्यते—

अनघाशय ! मृष्यतामिदं, मम वश्यं न मनो न चेतना ।
तदहो! न विचिन्तयान्यथा, विनयाधीनमिदं व्रजेद्वपुः ॥१८८॥

अनघाशयेति मर्षणप्रार्थनाहेतुः । कस्तेऽपराधः ? येन मर्षणं प्रार्थयसे, तत्राह —ममेत्यादि । मनश्चेतनयोर्मदनधीनतया त्वदभिमतानङ्गीकार एव ममापराध इति । तद् मनश्चेतनयोरवश्यत्वाद्धेतोः । अहो इति खेदे । अन्यथा ईर्ष्याद्यधीनानिष्टाचरणरूपेण । विनयस्येर्ष्यादिविरोधिनोऽधीनम् । महिषीत्वाङ्गीकारस्यासम्भाव्यता गम्यते । बीजार्थोपगमात्मा सान्धिरङ्गम् ॥

तदानीन्तनीं दशामुपमया दर्शयति कविः—

स्फुटमन्तरुदित्वरेण सा स्वविचारेण तदाऽप्यवेपत ।
स्वदुकूलविसारिणा द्रुतं शिखिनाऽङ्गं दहतेव बालिका ॥१८९॥

उदित्वरेणोत्तरोत्तरं प्रवर्धमानेन स्वेनासाधारणेन, पूर्वकविजातीयेनेति यावत् । दुस्सहत्वं गम्यते । दुकूले स्वविशेषणेन विसरणस्याऽविज्ञातत्वञ्च ।

द्रुतं दाहप्रतिबन्धकाचरणं यथा नोपपद्यते तथा। बालिका दयास्पदं बाला उपमया मूर्च्छाद्यवस्था व्यज्यते ॥ १८९ ॥

अतिक्रान्तायामपि सन्ध्यायां सीतामुटजेऽसन्निहितां मार्गयमाणो-पवनान्तं प्रविष्टा काचन सखी तापसी तस्याश्चिन्तां व्यरमयदित्याह—

'उच्चैरभादुडुततौ रजनीमुखे या
सा पश्चिमाद्रिशिखरेषु तिरोदधाति ।
अन्योऽसंहतिरुदेति किमेतदत्रे–
त्येतामगात् सपदि कापि तपस्वियोषा ॥ १९० ॥

इतीत्यन्तं तपस्वियोषावाक्यम्। अनुचिते काले देशे त्वमेकाकिनी चिरं वर्त्तसे, कोऽत्र हेतुरिति भावः ॥ १९० ॥

अनन्तरवृत्तान्तं स क्षिपति—

तदनु च बहुवारं प्रोक्ष्य तीर्थं सतीं सा
सदयमवद न्तश्चोटजेऽशाययत् ताम् ।
समगत च विभातं भासुरं, कोसलेभ्यः
कुलपतिरुपतस्थे रामसन्देशवाहः ॥ १९१ ॥

प्रोक्ष्य तीर्थमिति सूचितमूर्च्छापगमार्थम्। सदयमिति दयायास्तदानीन्तना-धिक्यं गमयति। "समो गमृच्छिभ्याम्" इत्यात्मनेपदं समगतेति। उपतस्थ इति तु सङ्गतिकरणार्थे। समागतोऽभूदित्यर्थः। चकारः क्रियाद्वय-समुच्चये। अनेन समागमस्याप्रतीक्षितत्वं गम्यते। तथाविधागमने हेतुः— रामसन्देशवाहः इति। स्वयं दौत्याङ्गीकारेण कार्यगौरवमितरानिर्वाह्यत्वरूपं ध्वन्यते ॥ १९१ ॥

विचारफलं देवीदेहत्यागात्मकं पताकानायकव्यापारोपकृतं प्रदर्श-यन्नुपसंहरति—

'वत्से ! मा स्म शुचोऽनुयाहि सुख'मित्याशंसिनो योगिनः
पादाब्जे निहितेक्षणा नृपसभं सम्प्राप्य चाऽधोमुखी ।
तूष्णीमन्तिकमेत्य तं त्वनुशयक्लान्तास्यमालोकयत्
कान्तं पौरसमक्षमेवमथ सा तत्याज लोकं सती ॥१९२।

त्वं मा स्म शुचः, सुखमाप्नुहीति लोकदृष्ट्या। नेतः परं सांसारिकस्ते क्लेशः, परमानन्दं लक्ष्यीकृत्य प्रवर्त्तस्वेति मुन्यभिप्रायेण। अत एव योगिन इति। नृपसभमिति जनबाहुल्यं गम्यते। "सभाराजे"त्यादिना क्लीबत्वम्। योगिनः पादाब्जेत्यादिना आलोकयदित्यन्तेन लज्जादिव्यक्तिः। अभयप्रदानेन ज्ञानविज्ञानसम्पादनेन चोपकृतवति श्रीवाल्मीकौ भक्त्यतिशयात्तदनुवर्त्तनेच्छा तु निगूढा। कान्तालोकनस्य तु मदीयेयं दशा भवतोऽप्यविलम्बेन भाविनीति। पौरसमक्षमिति सतीत्वख्यापनाय। तत्याज लोकमिति "जनयित्रि ! विलोकयाम्यहं" मित्यादेरध्यवसितस्य निर्वहणम्। सतीत्यन्ते मङ्गलार्थम्। दाक्षायणीसाम्यं शब्दशक्त्या गम्यते। अद्भुतप्राप्तिः काव्यार्थोपसंहारश्चेत्यर्थद्वयमत्र। ॥१९२॥

इत्थं साङ्गैर्मुखादिभिः सुगाढानुबद्धचिन्तात्मकेतिवृत्ते प्रबन्धेऽस्मिन्नङ्गी रसः शान्तः मोक्षश्च परमः पुमर्थ इत्यवसीयते। शान्तस्य स्थायी तत्त्वज्ञानोत्थो निर्वेद इति केचित्। अत एव "नियमोऽस्ति" इत्यारभ्य आसमाप्ति क्रमशः प्रवृद्धा मतिर्विषयनिर्वेदायोपकुर्वाणा "किमियं पुन"रित्यन्तेन परां कोटिमारूढा निबद्धेति। अपरे तु शरीरेन्द्रियविषयविषयिण्या रतेर्विलक्षणा "यश्चात्मरतिरेव स्यादात्मतृप्तश्च" इति श्रीगीताद्युपदर्शितस्वभावाऽत्मविषयिणी सा शान्तस्य स्थायिनी। यतो विश्वमेव वैकृतं हास्यस्य, विनाशित्वेन शोकस्य, अनिष्टापादकत्वेन क्रोधस्य, संमोहे सति विनिपातापत्त्याभयस्य, असम्मोहाध्यवसायात्मकोत्साहस्य, दोषास्पदत्वेनजुगुप्सायाश्चास्पदं पश्यन्तस्तत्त्वज्ञानोत्थं स्वमहिमानं सवि-

स्मयमाकलयन्तश्च तत्त्वज्ञानोपस्कृतामात्मगतिमेवाद्रियन्ते महान्तः । तादृश्येव मैथिल्यत्रापि चिन्तिता तत्ततत्रेत्यातिष्ठन्ते। अभिनवभारत्यनुयायिनस्तु अस्त्येवात्र प्रबन्धरत्ने परापरमुक्तेः परामर्शः। तां प्रति तत्त्वज्ञानमेव परमं कारणममनन्ति सर्वे तान्त्रिकाः। तच्चात्मतद्विरविषयकतया द्विधा । तत्र प्रथमं द्वितीयेन विषयनिर्वेददार्ढ्यसम्पादनद्वारोपस्कृतं सद्विषयवासनास्रोतः खिलीकरोति आत्मरतिं प्रवृद्धां विधत्ते च । आत्मा च ज्ञानानन्दरूप इत्यौपनिषदाः। तादृशमात्मानमेव स्थायिनं "ध्रुवशान्तिस्तु" "विशदं हि विभाति" इत्यादिरूपेणानुसन्धत्ते देवीत्याहुः। इत्थञ्च वीचीतरङ्गन्यायेन सुगाढपूर्वापरबन्धचिन्तां सीतां सहृदयचेतस्यार्पयतो मूलप्रबन्धरत्नस्य सीताविचारलहरीति नामान्तरकरणमपि विवरणायत इति सहृदयवरेण्यैराकलनीयमिति सर्वं शिवम् ॥

श्रीनारायणभूसुराद् बुधवराद्विज्ञाय शब्दागमं
कृत्स्नं रामपिषारकात् सहृदयैराराधितात् साहितीम् ।
काणादादि परीक्षिदाख्यनृपतेर्गोश्रीशमुक्तामणे—
विश्वामित्रमुनेरृचीकतनयो मन्त्रं यथा भाति यः ॥
सीताविचारलहरीतरणी रचिता मया ।
* "पूर्णत्रयीशदास्ये"न तेनपूतहृदा मुदा ॥

श्लोकानुक्रमणी

	Page		Page		Page
अकुपत्	50	अपि धार्मिक	44	इदमेव	13
अगमम्	43	अपि नैष	43	इयमस्ति	44
अजहात्	22	अभिनम्	18	इयमस्तु	64
अतिमानुष	59	अभिमान	48	इह तैर्वनिता	29
अतिवृष्टि	26	अमुना	31	इह नीतिगति	55
अतिवेल	5	अयि देवर	24	इह साय	65
अतुलात्	58	अयि राग	47	उचिता व्रत	12
अथवातिमनो	65	अलमावयवा	4	उच्चैरभाद	70
अथवा द्विगुणाम्	18	अवकाश	30	उटजे	44
अथवा नय	50	अवसः	21	उदयास्तमयौ	11
अथवा नृप	51	अवसाम	36	उपयाति	17
अथ वाम	40	अविचिन्त्य	22	कति वा	61
अथ सानुनि	66	अवियुक्त	15	कलये	19
अथवास्ति	14	अविषह्य	20	किमिय पुन	69
अधिदण्डक	52	अविहाय	12	कृपयेव	43
अधिरोपयितुम्	16	अवृणोज्ञनता	38	कृमिवत्	9
अधुना नृप	54	असजद्यदधे	20	कृमिवत् स्फुरतो	21
अनघाशय	69	अहह स्मृति	33	क्रियते हि	68
अनतिक्षुभिता	55	इतरेतरभेद	42	क्षणमात्र	10
अनिवार्यरुजा	57	इतरेतररागि	35	क्षुभितेन्द्रिय	60
अप्रकीर्त्तिं	41	इतरेषु वितीर्य	63	गज इत्यनुमाय	53
अपनीय	24	इति तनि मनुष्य	40	गणिता	25
अपयाति	8	इति तान्यति	53	गतगर्व	45
अपिचास्तमय	3	इति भूपतिरेव	34	गतभा	31
अपि दग्ध	27	इतिहास	28	गहनेषु	16

	Page		Page		Page
गिरिकानन	22	नहि देहिनि	63	मनुजस्य नही	20
गिरिगह्वर	40	निजगा:	64	मम दोहद	42
गिरिनिर्झर	66	निजदोष	31	मयि सोऽम्फुटयत्	34
चरितं मम	61	निनदम्	57	मलिना किल	27
जगदस्ति	26	नियमानति	45	महता प्रणयेन	34
जनयित्रि	66	नियमोऽस्ति	6	महते तपसे	59
डयिता	66	निशमय्य	10	मुकुटं तद	58
तटिनी	67	पतिचित्त	41	मुनिदर्शित	24
तत एव	14	परकार्य	52	यजनेऽस्य	54
तदनु च	70	परगर्हण	30	यदि मज्जति	29
तदवैमि	56	परनिर्वृति	29	यदि वाति	60
तदहो	38	परतो नृप	33	यदि वा न	10
तनयम्	33	परिणीति	35	यदि वाऽनिलवत्	62
तम एव	15	परिशील्य	49	रथकेतु	32
तरल:	6	पशवस्तु	46	रमणीय	65
तरसाऽनु	40	पुरुषेषु	46	रसनाऽति	37
तरुपक्षि	27	पुलकान्	3	रुचिर:	3
तृषितानि	59	प्रियता	38	रुजया	68
वसति	69	प्रियया	57	वत्से मा स्म	71
दयितं प्रति	25	प्रिय राघव	67	वनशैल	23
दयितां प्रति	50	बाहेरप्रकटो	51	वसनानि	32
दयिते पर	39	बहु तादृश	52	वसुधे	66
दयितोऽयमनन्य	45	भरते वन	39	विगते	20
दुहित:	26	भुवनं शुभ	29	विटपोऽभजद्	2
ध्रुवमेव	36	भुवनस्य	7	विशदामकरोत्	17
न च दण्डयते	41	भ्रमदाकुल	5	विधिरभ्युदय	35
मार्गचरान्	47	मतिमान्	21	विद्युतां नव	3
वानि	46	मधुरा	32	विपुलेषु	23
	47	मनुजस्य तिरो	56	विभव	48

	Page		Page		Page
वेरहावसरे	54	समदृष्टि	48	सुलभेषु	8
वेशदं हि	63	समवेक्ष्य	53	सुषमा	55
विशयो नहि	53	समुदेति मनो	45	सुसिताम्बर	64
विशिखा	62	सरुजं मम	25	स्फुटता	13
शुशुर्भेऽशुक	4	सविपन्न	15	स्फुटमन्त	69
श्रियमेव	37	सहजा निहता	49	स्फुटलक्ष्य	4
श्रुतमिन्द्र	23	सहजामल	46	स्वयमिन्द्रिय	11
श्रुतिवन्महिता	28	सुकरा दयिता	58	स्वहतौ न	17
श्वशुरोऽशुभ	43	सुतयोर्गतयो	1	हृदयद्रुति	13
सततोद्यद्	30	सुपरीक्षित	33	हृदये ज्वलितात्	51

संशोधनम्

अशुद्धम्	शुद्धम्	Page	Line	अशुद्धम्	शुद्धम्	Page	Line
तटे	तले	5	3	खन्धु	स्वबन्धु	24	18
,,	,,	,,	8	पूवो	पूर्वो	46	11
मीरिण	मीरण	7	6	निंरशोष	निरशेष	50	17
शोक	शोक	,,	13	धमे	धर्म	54	2
निवेद	निर्वेद	,,	17	त्याञ्चि	त्वाञ्चि	56	2
पैनि	पैति	10	12	नेल	निल	,,	11
वेकना	वेकेन	12	12	शंस	शंसे	57	3
अनन्द	आनन्द	,,	19	णीन	णीनं	,,	8
शुभशु	शुभाशु	16	1	भ्राज्य	भ्राज्य	64	2
दति	दाति	19	14	पसचि	पसोचि	,,	14
न्विस्य	न्विष्य	,,	23	प्रण	प्राण	66	3
क्षाणि	क्षणि	23	5	दङ्ग	दङ्क	,,	22
				यवा	थवा	,,	23